नाप मत्कृते शौनकउ० ततः कन्यासहस्रेण वृता शिबिकया तदा पितुर्नियोगात्त्वरिता निश्चक्राम पुरोत्तमात्
शर्मिष्ठोउ० अहं कन्यासहस्रेण दासीभिः परिवारिता अनुयास्यामि यत्र त्वां दास्यति ते पिता देवयान्युवा
स्तुवतो दुहिताहं ते याचतः प्रतिगृह्णतः स्तूयमानस्य दुहिता कथं दासी भविष्यति शर्मिष्ठोउ० येन केन च दार्त्तानां
ज्ञातीनां सुखमावहेत् अनुयास्याम्यहं तत्र यत्र दास्यति ते पिता शौनकउ० प्रतिश्रुते दासभावे दुहित्रा वृ
षपर्वणः देवयानी नृपश्रेष्ठ दुहिता सुमहायशाः प्रविवेश पुरं हृष्टः पूजितः सर्वदानवैः इति श्रीमत्स्यपुरा
णे एकोनत्रिंशोऽध्यायः शौनकउ० अथ दीर्घेण कालेन तस्मिन्नेव द्विजोत्तम रम्यं तदेव निर्याता क्रीडार्थं व
रवर्णिनी तेन दासीसहस्रेण सार्द्धं शर्मिष्ठया तदा तमेव देशं संप्राप्ता यथाकामं चचार सा ताभिः सखीभि
ः सहिताः सर्वाभिर्मुदिता तत्र क्रीडन्त्योऽभिरताः सर्वाः पिबन्त्यो मधुमाधवीं खादन्त्यो विविधान्भक्ष्यान्विद
शन्त्यः फलान्यपि पुनश्च नाहुषो राजा मृगलिप्सुर्यदृच्छया तमेव देशं संप्राप्तो जलार्थी श्रमकर्षितः ददर्श देव मत्स्य०
यानीं शर्मिष्ठां ताश्च योषितः पिबन्तीर्ललमानाश्च दिव्याभरणभूषिताः उपविष्टां च ददृशे देवयानीं शुचिस्मि ३०
तां रूपेणाप्रतिमां तासां स्त्रीमध्ये वराङ्गनां शर्मिष्ठया सेव्यमानां पादसंवाहनादिभिः ययातिरुवाच द्वाभ्यां
कन्यासहस्राभ्यां द्वे कन्ये परिवारिते गोत्रे च नामनी चैव द्वयोः पृच्छाम्यहं ततः देवयान्युवाच आख्याम्यहम्
कन्यासहस्राभ्यां द्वे कन्ये परिवारिते गोत्रे च नामनी चैव द्वयोः पृच्छाम्यहं

णादत्स्व वचनं मे नराधिप शुक्रो नामासुरगुरुः सुतां जानीहि तस्य मां इयं च मे सखी दासी यत्राहं तत्र गामिनी दुहि 71
ता दानवेन्द्रस्य शर्मिष्ठा वृषपर्वणः ययातिरुवाच कथं नु ते सखी दासी कन्येयं वरवर्णिनी असुरेन्द्रसु 1448
ता सुभ्रु परं कौतूहलं हि मे देवयान्युवा० सर्व एव नरव्याघ्र विधानमनुवर्तते विहितं विधिना मत्वा मा विचि
त्राः कथाः कृथाः राजवद्रूपवेषस्ते ब्राह्मीं वाचं बिभर्षि च किं नाम त्वं कुतश्चासि कस्य पुत्रश्च शंस मे ययातिरु०
ब्रह्मचर्येण कृत्स्नो मे वेदः श्रुतिपथं गतः राजाहं राजपुत्रश्च ययातिरिति विश्रुतः देवयान्यु० केनार्थेन त्वं नृपते इ
दं देशं समागतः जिघृक्षुर्वारिजं किंचिदथवा मृगलिप्सया ययातिरुवाच मृगलिप्सुरहं भद्रे पानीयार्थमिहा
गतः बहुधाप्यनुयुक्तोऽस्मि तदनुज्ञातुमर्हसि देवयान्यु० द्वाभ्यां कन्यासहस्राभ्यां दास्या शर्मिष्ठया सह त्वदधीना
स्मि भद्रं ते सखी भर्ता च मे भव ययातिरुवाच विद्ध्यौशनसि भद्रं ते न त्वामर्होऽस्मि भामिनि अविवाह्या हि राजानो
देवयानि पितुस्तव देवयान्यु० संसृष्टं ब्रह्मणा क्षत्रं क्षत्रेण ब्रह्म संहितं ऋषिश्चाप्यृषिपुत्रश्च नाहुषाङ्ग वहस्व मां यया
तिरुवा० एकदेहोद्भवा वर्णाश्चत्वारोऽपि वराङ्गने पृथग्धर्माः पृथक्शौचास्तेषां तु ब्राह्मणो वरः देवयान्युवाच
पाणिधर्मो नाहुषोऽयं न पुंभिः सेवितः पुरा त्वया तमग्रहीरग्रे वृणोमि त्वामहं ततः कथं नु मे मनस्विन्याः पाणिमन्यः
पुमान्स्पृशेत् गृहीतमृषिपुत्रेण स्वयं वाप्यृषिणा त्वया ययातिरुवाच क्रुद्धादाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखा
त्सुदुर्धर्षतरो विप्रादित्यात्थ पुरुषर्षभ ययातिरुवा० एकमाशीविषो हन्ति शस्त्रेणैकश्च वध्यते हन्ति विप्रः सराष्ट्राणि पु

रागात्पितृकोपितः मुहुर्दूषयतो विप्रस्त्वस्यातीकृतस्तोमम अतो दत्तां हि पित्रा त्वां भद्रे न विवहाम्यहं देवयान्युवाच द
त्तां वहसि पित्रा मां त्वं हि राजन् वृतो मया अयाचतो न ते भयं नास्ति दत्तां च प्रतिगृह्णतः शौनक उवाच त्वरितं देवयान्याथ प्रे
षितं पितुरात्मनः सर्वं निवेदयामास धात्री न स्वयमागतं श्रुत्वैव च स राजानं दर्शयामास भार्गवः दृष्ट्वैव मागतं
विप्रं ययातिः पृथ्वीपतिः ववंदे ब्राह्मणं काव्यं प्रांजलिः प्रणतः स्थितः नेवाथ्यस्य च रक्षाम्यमास्यापरम वल्गु
ना देवयान्युवाच राजायं नाहुषस्तात दुर्गमे पाणिमग्रहीत् नमस्ते देहि मामस्मै लोके नान्यं पतिं वृणे शुक्र उवाच वृतोनया
पतिर्वीर सुतया त्वं ममेष्टया गृहाणेमां मया दत्तां महिषीं नहुषात्मज ययातिरुवाच अधर्मो न स्पृशेदेवं महान्मा
मिह भार्गव वर्णसंकरजो ब्रह्मन्निति त्वां प्रवृणोम्यहं शुक्र उवाच अधर्मात्त्वां विमोक्ष्यामि वरं वरय चेप्सितं अस्मिन् विवाहे मा
ग्लासीरहं पापं नुदामि ते वहस्व भार्यां धर्मेण देवयानीं सुमध्यमां अनया सह संप्रीतिमतुलां समवाप्नुहि इयं
चापि कुमारी ते शर्मिष्ठा वृषपर्वणी संपूज्या सततं राजन् मा चैनां शयने ह्वय शौनक उवाच एवमुक्तो ययातिस्तु शु
क्रं कृत्वा प्रदक्षिणं जगाम स्वपुरं हृष्टः सोनुज्ञातो महात्मना इति श्री मत्स्यपुराणे ययातिचरिते ३० शौनक उवाच यया मत्स्य०
तिः स्वपुरं प्राप्य महेंद्रपुरसंनिभं प्रविश्यांतःपुरं तत्र देवयानीं निवेशयेत् देवयान्याश्चानुमते सुतां तां वृषपर्व ३८
णः ददर्श शोकवनं प्राप्य सोऽन्तं साकमलेक्षणा विनयामास धर्मज्ञा ऋतुं प्राप्ते तु भामिनी ऋतुकालश्च संप्राप्तो न च
कश्चित्पतिर्वृतः किं प्राप्तं किंनु कर्तव्यं कथं कृत्वा कृतं भवेत् देवयानी प्रजातासि वृथाहं प्राप्तयौवना यथा तया वृ

तो भर्त्ता तथैवाहं वृणोमि तं राज्ञा पुत्रफलं देयं इति मे निश्चिता मतिः अपीदानीं स धर्मात्मा रहो मे दर्शनं व्रजे
त् शौनक उवाच अथ निष्क्रम्य राजासौ तस्मिन्काले यदृच्छया अशोकवनिकाभ्यासे शर्मिष्ठामभितः स्थितः त
मेकं रहसि दृष्ट्वा शर्मिष्ठा चारुहासिनी प्रत्युद्गम्यांजलिं कृत्वा राजानं वाक्यमब्रवीत् शर्मिष्ठोवाच सोमस्येंद्रस्य
विष्णोर्वा यमस्य वरुणस्य च तव वा नाहुष गृहे कः स्त्रियं द्रष्टुमर्हति रूपाभिजनशीलैर्हि त्वं राजन्वेत्थ मां सदा
सा त्वां याचे प्रसाद्याहं ऋतुं देहि नराधिप ययातिरुवाच वेद्मि त्वां शीलसंपन्नां दैत्यकन्यामनिंदितां रूपे तु ते न
पश्यामि सूच्यग्रमपि निंदितं अब्रवीदुशना काव्यो देवयानीं यदा वहं न चेयमाह्वयितव्या शयने वृषपर्वणी शर्मि
ष्ठोवाच न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले प्राणात्यये सर्वधनापहारे पंचानृतान्याहुरपातका
नि पृष्टास्तु साक्ष्ये प्रवदंति चान्यथा भवंति मिथ्यावचना नरेंद्र एकार्थतायां तु समाहितायां मिथ्या वदंतं ह्यनृतं हिन
स्ति ययातिरुवाच प्रमाणं भूतानां स विनश्येन्मृषा वदन् अर्थकृच्छ्रमपि प्राप्य न मिथ्या वक्तुमुत्सहे शर्मिष्ठोवाच समावे
तौ मतौ राजन् पतिः सख्याश्च यः पतिः समं विवाहमित्याहुः सख्या मेसि पतिर्वृतः ययातिरुवाच दातव्यं याचमानस्य
इति मे व्रतमाहितं त्वं च याचसि कामं मां ब्रूहि किं करवाणि ते शर्मिष्ठोवाच अधर्मात्पाहि मां राजन् धर्मं च प्रतिपा
दय त्वत्तोपत्यवती लोके चरेयं धर्ममुत्तमं त्रय एवाधना राजन् भार्या दासस्तथा सुतः यत्ते समधिगच्छंति यस्यै
ते तस्य तद्धनं देवयान्या भुजिष्यास्मि वश्या च तव भार्गवी सा चाहं तु त्वया राजन् भजनीया भजस्व मां शौनक उवा

73/1998

गावसुकृतस्यागतान्यामि स्वति जजिवान ॥ इज्यामामधर्मिष्ठे यथाकाममवाप्स्यव ॥ अन्योन्यंचापिमे इत्यज्ञमनु
ष्ठो यथागतं ॥ तस्मिन्गतेमहाराजे सुस्तुशर्मिष्ठा हृष्टवेपनी ॥ लेभे गर्भं प्रथमतस्तस्माद्गन्दपमत्रमत ॥ जज्ञे च ततः का
ले राजा राजीवलोचनः ॥ कुमारं देवगर्भाभमादित्यसमवर्चसं ॥ इतिश्री मत्स्यपुराणे ययातिचरिते ३१ शौनक उ०
गवं दृष्ट्वा तु राजानं कुमारान्पर्यपृच्छत ॥ किंनामधेयं गोत्रं वा पुत्रकामः कस्य पेटिताः ॥ किंवृत्तमे यथातथ्यं श्रोतुमि
च्छामि यन्वहं ॥ ते दर्शयन्त्र देशिन्याग मे वन्दपमत्र मे शर्मिष्ठां मातरं चैव तस्यामूर्तुस्थसा रकाजं शौनक उ० इत्यु
क्ता सहितास्ते तु राजानमुपचक्रमुः ॥ नाभ्यनंदत तान्राजा देवयान्यास्तदंतिके ॥ रुदंतस्ते तु शर्मिष्ठामभ्ययुर्बाल
कास्तदा ॥ दृष्ट्वा तु तेषां बालानां प्रणयं पार्थिवं प्रति ॥ बुद्ध्वा च तत्वतो देवी शर्मिष्ठामिदमब्रवीत ॥ देवयान्युवाच म
दधीनासती कस्मादकार्षीर्विप्रियं मम ॥ तमेवासुरधर्मं त्वमास्थिता न बिभेषि किं ॥ शर्मिष्ठोवाच यदुक्तमृषिरित्ये
वं तत्सत्यं चारुहासिनी ॥ न्यायतो धर्मतश्चैव चरंती न बिभेमि ते ॥ यदि त्वया वृतो भर्ता वृत एव मया तदा ॥ सखिभ
र्ता हि धर्मेण भर्ता सख्याः स्त्रीनेता ॥ पूज्यासि मम मान्या च श्रेष्ठा श्रेष्ठा च ब्राह्मणी ॥ त्वत्तोऽपि मे पूज्यतरो राजर्षिः किं न वे मत्स्य०
त्सि तं ॥ शौनक उवाच ॥ श्रुत्वा तस्यास्तु तद्वाक्यं देवयान्यब्रवीदिदं ॥ राजन्नाद्येह वत्स्यामि विप्रियं मे त्वया कृतं सद ३०
सेसुत्थितां तूर्णं तां दृष्ट्वा नामाश्रुलोचनां ॥ तूर्णं संकाशं काव्यस्य प्रस्थितां व्यथितां स्वयं ॥ अनुवव्राज संभ्रांतः पृष्ठतः
सांत्वयन्नृपः ॥ न्यवर्तत न चैवस्म क्रोधसंरक्तलोचना ॥ अविब्रुवंती किंचिद्वा राजानं साश्रुलोचना ॥ अचिरादेव संप्राप्ता

काव्यस्योशनसोंतिकं ॥ सा तु दृष्ट्वैव पितरं अभिवाद्याग्रतः स्थिता ॥ अनंतरं ययातिस्तु पूजयामास भार्गवं ॥ देवयान्यु०
अधर्मेण जितो धर्मः प्रवृत्तमधरोत्तरं ॥ शर्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्वणः ॥ त्रयोस्यां जनिताः पुत्रा राज्ञानेन य
यातिना ॥ दुर्भगाया मम द्वौ तु पुत्रौ तात ब्रवीमि ते ॥ धर्मज्ञ इति विख्यात एष राजा भृगूद्वह ॥ अतिक्रांतश्च मर्यादां काव्ये
तत्कथयामि ते ॥ शुक्र उ० धर्मज्ञस्य महाराज यो धर्ममकृथाः प्रियं ॥ तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया ॥ ययाति
रु० ऋतुं वै याचमानाया न ददाति पुमान्वृतः ॥ भ्रूणहेत्युच्यते ब्रह्मन्स इह ब्रह्मवादिभिः ॥ ऋतुकामां स्त्रियं यस्तु
गम्यां रहसि याचितः ॥ नोपैति हि स धर्मेषु भ्रूणहेत्युच्यते बुधैः ॥ इत्येतानि समीक्ष्याहं कारणानि भृगूद्वह ॥ अधर्मभय
संविग्नः शर्मिष्ठामुपजग्मिवान ॥ शुक्र उ० नन्वहं प्रत्यवेक्ष्यस्ते मदधीनोसि पार्थिव ॥ शौनक उ० क्रुद्धेनोशनसा शप्त
ययातिर्नाहुषस्तदा ॥ पूर्वं वयः परित्यज्य जरां समयोऽवपद्यत ॥ ययातिरु० अतृप्तोस्मि वनेऽस्मिन्च देवयान्यां भृगूद्वह
प्रसादं कुरु मे ब्रह्मन्नरयेनाविशेन मां ॥ शुक्र उवाच ॥ नाहं मृषा ब्रवीम्येतज्जरां प्राप्तोसि भूमिप ॥ जरां त्वेतां त्वमन्यस्मि
न्संक्रमय यदीच्छसि ॥ ययातिरु० राज्यभाक्स भवेद्ब्रह्मन्पुण्यभाक्कीर्तिभाक्तथा ॥ यो मे दद्याद्वयः पुत्रस्तद्भवाननुमन्यतां
शुक्र उवाच ॥ संक्रामयिष्यसि जरां यथेष्टं नहुषात्मज ॥ मामनुध्याय तत्वेन न च पापमवाप्स्यसि ॥ वयो दास्यति ते पु
त्रो यः स राजा भविष्यति ॥ आयुष्मान्कीर्तिमांश्चैव बह्वपत्यस्तथैव च ॥ इतिश्री मत्स्यपुराणे ययातिचरिते शौनक उ०
जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ॥ पुत्रं ज्येष्ठं वरिष्ठं च यदुमित्यब्रवीद्वचः ॥ ययातिरुवाच ॥ जरा वलनमाना न पलि

115
1998

तान्त्विपर्शुगुः कान्यस्मो कामः ग्रापान्नवन्न मोस्मि यौवने त्वमदो प्रतिपद्यस्व पाप्मानं जरयामह यदुरु० भितनम
श्रुघ रोदीतो जरयाशिथिली हृतः बली मंत्र तगाम स्तुउ ईशोउर्बल हृत्राः अग्राकाः कार्यकरणे परिम्र तस्मयो वनेः
महो वितीवित स्मेवन क्रनं नामि कामये मंतिते वहवः पुत्राः मनः प्रियनरान्नपः जरो गृहीत्वं धर्मज्ञ पुत्रमन्यत्र
वीहितेः ययातिरु० यस्त्वं मे हृदयाक्रान्तो मम यौवन प्रयच्छसि पाप्मनो तुलसमेवं धाउः प्रजो वेनविष्यसि तुर्वसोप्र
तिपद्यस्व पाप्मानं जरयामह यौवनेन तवरे यं वे विषयोम्नवघुत्रका पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवने स्वंचदा
स्यामि च योपि पाप्मानं जरयामह तुर्वसुरुवाच न गजे नरथे नाश्वं जीर्णो भुक्ते न च स्त्रियं नीरागास्याम्मनवतिनजरां
तेन कामये ययातिरु० यस्त्वं मे हृदयाक्रान्तो वयस्त्वं प्रयच्छति तस्मात्प्रजा[…] कामन्ते मं पक्षपते क्षविन
नाधुयत्र व मंवारीयन्नतिसंतविष्यति राजसतोजस्माहत्वं तत्र प्राप्स्यसि यान्वयः […]रुवाच त्वतो त्वं प्रतिपद्य
स्व पाप्मानं जरयामह एवं वर्षसहस्रे तु वरे यं यौवनेन ते द्रुह्युरुवाच जीर्णोऽश्मि […] एतस्ते काले न मस्तुविषया
न तु होति वकाले स्मिं नाजन्नामि कामये ययातिरुवाच यस्त्वं मे हृदयाक्रान्तो वयः […]न प्रयच्छसि जरादोषः स्मा मत्स्य०
यो की यः तस्मात्वं प्रतिपद्यसे प्रजास्तु यौवने मासाविनिमंसर्णावं तथा […] राजा नाम्नं वा प्ये क्वविष्यसि यया ४०
तिरुवाच स्त्वं प्रतिपद्यस्व पाप्मानं जरयामह एवमुक्तः मनुवाच पुरुः पितरं प्रजना यथात्थ त्वं महाराज तत्करि
ष्यामि ते वचः प्रतिपत्स्यामि ते राजन्पाप्मानं जरयामह गृहाण यौवनं मत्तः चर कामान्यथेप्सितान् जरयाहं प्रतिच्छ

न्नो वयोरूपधरस्तव यौवनेन वनोरत्वाचरिष्यामि यथोच्यते या ययातिरुवाच पुरो प्रातोऽस्मि ते वत्स वरं ते सम्प्रदामि
ते सर्वकामसमृद्धा स्ते प्रजा राज्येन विष्यति इतिश्रीमत्स्यपुराणे ययातिचरिते ३३ शौनक उवाच एवमुक्तास राज
र्षिः काव्यं स्मृत्वा महाव्रतं संक्रमयामास तेजरां नाहुषो महात्मनि पौ[…]वं समाप ययातिर्नहुषात्मजः प्रीति
युक्तो नरश्रेष्ठश्चचार विषयान्प्रियान् यथाकामं यथोत्साहं यथाकालं यथासुखं […]विरुद्धान्राजेन्द्र यथार्हति स
एव हि देवानतर्पयद्यज्ञैः श्राद्धैरपि पितामहान् दीनाननुग्रहैरिष्टैः कामैश्च द्विजसत्तमान् […] अतिथीनन्नपानैश्च विशश्च
प्रतिपालनैः आनृशंस्येन शूद्रांश्च दस्यून्निग्रहणेन च धर्मेण च प्रजाः सर्वा यथावदनुरञ्जयन् ययातिः पालयामा
स साक्षादिन्द्र इवापरः स राजा सिंहविक्रान्तो युवा विषयगोचरः अविरोधेन धर्मस्य चचार सुखमुत्तमं स संप्राप्य शु
भान्कामांस्तृप्तः खिन्नश्च पार्थिवः कालं वर्षसहस्रं तु सस्मार मनुजाधिपः परिसंख्याय कालज्ञः कलाः काष्ठाश्च वीर्यवान् पू
र्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिव
र्धते यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति यथाकामं यथोत्साहं यथार
कामं समरिंदम सेविता विषयाः पुत्र यौवनेन मया तव पूरो प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनं राज्यं चैव गृहाणे
दं त्वं हि मे प्रियकृत्सुतः शौनक उ० प्रतिपेदे जरां राजा ययातिर्नहुषात्मजः यौवनं प्रतिपेदे च पूरुः स्वं पुनरात्मनः
राज्येऽभिषेक्तुकामं तं पूरुं पुत्रं कनीयसं ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् कथं शुक्रस्य नप्तारं देवयान्याः

५।५
१९९८

सुतभवनो ज्येष्ठं यदुमतिक्रम्य राज्ये प्रतिष्ठाप्यसि ज्येष्ठो यदुः तव सुतस्तु र्वसुस्तदनंतरं शर्मिष्ठायाः सुतो द्रुह्युस्ततो
नुः पूरुरेव च कथं ज्येष्ठमतिक्रम्य कनीयान् राज्यमर्हति एतत्संबोधयामास्त्व धर्ममनुपालय ययातिरुवा
ब्राह्मणप्रमुखा वर्णाः सर्वे श्रृण्वंतु मे वचः ज्येष्ठं प्रति यथा राज्यं न देयं मे कथंचन मम ज्येष्ठेन यदुना नियोगो ना
नुपालितः प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः स पुत्रः पुत्रवद्वर्त्तते
पितृमातृषु यदुनाहमवज्ञातः तथा तुर्वसुनापि च द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशं पूरुणा मत्कृतं वाक्यं
मानितं च विशेषतः कनीयान्मम दायादो जरा येन धृता मम मम कामः स च कृतः पूरुणा रूपिणा शुक्रेण च व
रो दत्तः काव्येनोशनसा स्वयं पुत्रो यस्त्वानुवर्त्तेत स राजा पृथिवीपतिः भवतः प्रतिजानंतु कनीयानपि स प्रभुः
हरोराज्येस्थितो प्रकृतय ऊचुः यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा सर्वमर्हति कल्याणं कनीयानपि
स प्रभुः अर्हः पूरुरिदं राज्यं यः प्रियः प्रियकृत्तव वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरं पौरजान
पदैस्तुष्टैरित्युक्तो नाहुषस्तदा अभिषिच्य ततः पूरुं राज्ये स्वसुतमात्मजं दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः मत्स्य
पुराग्निनिर्ययौ राजा ब्राह्मणैस्तापसैः सह यदोस्तु यादवा जातास्तुर्वसोर्यवनाः सुताः द्रुह्योः सुतास्तु वै भोजा अनो ४७
स्तु म्लेच्छजातयः पूरोस्तु पौरवो वंशो यत्र जातोसि पार्थिव इदं वर्षसहस्राय राज्यं कारयितुं वशी इति श्री मत्स्यपुरा
णे ययातिचरिते शौनकउ एवं स नाहुषो राजा ययातिः पुत्रमीप्सितं राज्येभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः अपि

त्वा वनवासं स ब्राह्मणैः सह संशितः फलमूलाशनो दांतो ययातिः स्वर्गतो गतः स[..]पुरवासं च स वसन्मुदितः
सुखी कालस्य नातिमहतः शक्रेण विनिपातितः स पतन्प्रच्युतः स्वर्गाद्प्राप्तो मार्ग[..]ीतलं ष्पितर्वसुमीदेन
स्थिःसतदेतिश्रुतं मया ततएवं पुनश्चापि गतः स्वर्गमिति श्रुतिः राज्ञा वसुमनासार्द्धं [..]केन च वीर्यवान् प्रतर्दा
नेन शिबिना समेत्याकिल संसदि ऋषय ऊचुः कर्मणा केन स दिवं पुनः प्राप्तो महीप[..] कथमिंद्रेण गतवान् पाति
तो मेदिनीतले सर्वमेतदशेषेण श्रोतुमिच्छामि तत्त्वतः कथ्यमानं त्वया विप्र[..]गणसन्निधौ देवराजसम
मो ह्यासीद्ययातिः पृथिवीपतिः वर्द्धनः कुरुवंशस्य विभावसुसमद्युतिः तस्य वि[..]र्णवंशस्य सत्कीर्त्तेर्महा
त्मनः चरितं श्रोतुमिच्छामि दिवि चेह च सर्वशः शौनक उ हंत ते कथयिष्यामि ययातेरुत्तमां कथां दिवि चेह च
पुण्यां सर्वपापप्रमोचनीं ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसं राज्येभिषिच्य मुदितः प्रवव्राज वनं तदा
अंत्येषु स विनिक्षिप्य पुत्रान्यदुपुरोगमान् फलमूलाशनो राजा वने सोन्यवसच्चिरं संशितात्मा जितक्रोधस्तर्पयन्पि
तृदेवताः अग्नींश्च विधिवज्जुह्वन्वानप्रस्थविधानतः अतिथीन्पूजयामास वन्येन हविषा विभुः शिलोंछवृ
त्तिमास्थाय शेषान्नकृतभोजनः पूर्णं वर्षसहस्रं वै एवंवृत्तिरभून्नृप अब्भक्षः शरदस्त्रिंशदासीन्नियतवाङ्म
नाः ततश्च वायुभक्षोभूत्संवत्सरमतंद्रितः पंचाग्निमध्ये च तपस्तेपे संवत्सरं पुनः एकपादस्थितश्चासीत्षण्मा
सानानिलाशनः पुण्यकीर्त्तिस्ततः स्वर्गं जगामावृत्य रोदसी इति श्री मत्स्यपुराणे सोमवंशे ययातिचरिते २५ शौनक

79
1998

उवाच॥ स्वर्गतस्तु महाराजो न्यवसद्देवसद्मनि॥ पूजितस्त्रिदशैः साध्यैर्मरुद्भिर्वसुभिस्तथा॥ देवलोकाद्ब्रह्मलोकं
संचरन्पुण्यकृद्वशी॥ अवसत्पृथिवीपालो दीर्घकालमिति श्रुतिः॥ स कदाचिन्नृपश्रेष्ठो ययातिः स्वर्गमागमत्॥ त
दा राज्यं संप्रदायैव तस्मै त्वया किमुक्तः कथयेह सत्यं॥ ययातिरुवाच॥ गंगायमुनयोर्मध्ये कृत्स्नोयं विषयस्तवा
मध्ये पृथिव्यास्त्वं राजा भ्रातरोंत्याधिपास्तव॥ अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः॥ अमा-
नुषेभ्यो मानुषश्च प्रधानो विद्वांस्तथैवाविदुषः प्रधानः॥ आक्रोश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः॥ आक्रोष्टा-
रं निर्दहति सुकृतं चास्य विंदति॥ नारुंतुदः स्यान्नृशंसवादी न हीनतः परमभ्याददीत॥ ययास्य वाचा पर उद्वि-
जेत न तां वदेदुषतीं पापलोक्यां॥ अरुंतुदं परुषं तीक्ष्णवाचं वाक्कंटकैर्वितुदंतं मनुष्यान्॥ विद्यादलक्ष्मीकतमं ज-
नानां मुखे निबद्धां निर्ऋतिं वहंतं॥ सद्भिः पुरस्तादभिपूजितः स्यात्सद्भिस्तथा पृष्ठतो रक्षितः स्यात्॥ सदासता-
मतिवादांस्तितिक्षेत्सतां वृत्तं पालयन्साधुवृत्तः॥ वाक्सायका वदनान्निष्पतंति यैराहतः शोचति रात्र्यहानि॥ प-
रस्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेषु॥ न हीदृशं संवननं त्रिषु लोकेषु किंचन॥ यथा मैत्री च भूतेषु मत्स्य०
दानं च मधुरा च वाक्॥ तस्मात्सांत्वं सदा वाच्यं न वाच्यं परुषं क्वचित्॥ पूज्यान्संपूजयेद्दद्यान्नाभिशापं कदा- ३४
चन॥ इति श्रीमत्स्यपुराणे ययातिचरिते ३६ इंद्र उवाच॥ सर्वाणि कर्माणि समाप्य राजन्गृहान्परित्यज्य वनं गतोसि॥ त-
त्त्वां पृच्छामि नहुषस्य पुत्र केनासि तुल्यस्तपसा ययाते॥ ययातिरुवाच॥ नाहं देवमनुष्येषु न गंधर्वमहर्षिषु॥ आत्मन-

स्तपसा तुल्यं किंचित्पश्यामि वासव॥ इंद्र उवाच॥ यदावमंस्थाः सदृशः श्रेयसश्च पापीयसश्चाविदितप्रभावः॥ तस्मा-
ल्लोकांतवंतस्तवेमे क्षीणे पुण्ये पतितासि राजन्॥ ययातिरुवाच॥ सुरर्षिगंधर्वनरावमानात्क्षयं गता मे यदि शक्र लो-
काः॥ इच्छेयं वै सुरलोकाद्विहीनः सतां मध्ये पतितुं देवराज॥ इंद्र उवाच॥ सतां सकाशे पतितोसि राजंश्च्युतः प्रतिष्ठां य-
त्र लब्धासि भूयः॥ एवं विदित्वा तु पुनर्ययाते न तेवमान्याः सदृशः श्रेयसश्च॥ शौनक उवाच॥ ततः प्रहायामरराजजुष्टान्पु-
ण्याँल्लोकान्पतमानं ययातिं॥ संप्रेक्ष्य राजर्षिवरोष्टकस्तमुवाच सद्धर्मविधानगोप्ता॥ अष्टक उवाच॥ कस्त्वं युवा वास-
वतुल्यरूपः स्वतेजसा दीप्यमानो यथाग्निः॥ पतस्युदीर्णाम्बुधरान्धकारात्खात्खेचराणां प्रवरो यथार्कः॥ दृष्ट्वा च त्वां सू-
र्यपथात्पतंतं वैश्वानरार्कद्युतिमप्रमेयं॥ किं नु स्विदेतत्पततीति सर्वे वितर्कयंतः परिमोहिताः स्म॥ दृष्ट्वा च त्वाधि-
ष्ठितं देवमार्गे शक्रार्कविष्णुप्रतिमप्रभावं॥ अभ्युद्गतास्त्वां वयमद्य सर्वे तत्त्वं पाते तव जिज्ञासमानाः॥ न चापि त्वां
धृष्णुमः प्रष्टुमग्रे न च त्वमस्मान्पृच्छसि देवयेस्मान्॥ तत्त्वां पृच्छामि स्पृहणीयरूपं कस्य त्वं वा किंनिमित्तं त्वमागाः॥ भयं तु
ते व्येतु विषादमोहौ त्यजाशु देवेंद्रसमानरूप॥ त्वां वर्तमानं हि सतां सकाशे नालं प्रसोढुं बलहापि शक्रः॥ संतः प्र-
तिष्ठा हि सुखच्युतानां सतां सदैवामरराजकल्प॥ ते संगताः स्थावरजंगमेशाः प्रतिष्ठितस्त्वं सदृशेषु सत्सु॥ प्रभुरग्निः प्रत-
पने भूमिरावपने प्रभुः॥ प्रभुः सूर्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः॥ इति श्रीमत्स्यपुराणे ययातिचरिते ३७ ययातिरु०
अहं ययातिर्नहुषस्य पुत्रः पूरोः पिता सर्वभूतावमानात्॥ प्रभ्रंशितोहं सुरसिद्धलोकात्परिच्युतः प्रपताम्यल्पपुण्यः॥ अहं

81
1998

हिष्टं वा चयमानवस्त्रेनानिवादेन वमानं प्रयुक्तो विष्णु पातयमा जन्मनो बुद्धेः संबंधो न वनि छिजानां॥ श्रीष्टक उवाच
श्रवा दीर्घ्रं दयमा ग्रहः यनि वैना जन्मा धिकः कश्चित्॥ यो वै विद्वान् वै मा संप्रहृष्टमनाव इयो न वनि छिजानां
श्रुति कुले कर्मणां वा यमा लस्य दर्शिनो प्राव णां या पत्नो कः॥ सनी मनां चान्यय वर्त्तयेत छुष्यावान्मै या मनु कृ
त्वनादी॥ अन्तरनं मे विपुले महेंद्र किंचे छमानो धिमतावदसि॥ एवं प्रधा यो त्वाद्विनो विनि छो यो वर्त्तते सविजा
नामि जीवन॥ नानो गां वृत्तो जीवन्नो का देवाधि दान दे वे जा विचारः॥ नत्वाप्पनाविहस्मे न धीगं ददं विल्मी यै ने मत्वा
त्मयु छो॥ सुखे हि वर्षजं नु यरि वापि दुःखं देवाधीनं वदेति चाम्मशक्या॥ नस्मा हि ह वल वन्मनस्य मानान संज्वरेत॥
पि हृष्टो त्कदाचित॥ दुःखेन मृत्युं न सुखेन दर्पेस्म मे वर्त्तेत स देव धीरः॥ नस्मा हिष्टं वल वन्मनस्य मानो न संज्वरे नापि हृष्ये
त्कदाचित॥ भयेन मृत्या प्प हृष्टकाहं॥ कदाचिम्मे नाथो मे मन सो नास्ति किंतु॥ धानाय घामा विदधानिलो के प्रफ वंतथा
हं भविते तिमत्वा॥ संस्वेद जज रायुजो उद्भोदिग्य सरिसृपाः स्व हृ मयो यथा सुमम्माः॥ तथा कर्मा प्रमाण कासंच सर्वेदि
ष्टकृये स्यो प्रवृत्तिन जंते॥ अनित्यं सुख दुःख स्य बुधा कस्मात्संगम ह काहं भजेयं॥ किं कुर्यां वै किंच हल्ला न तथे॥ भस्म०
त्तस्मात्से नापि व र्त्तयाम्य प्रमत्तः॥ एवं ब्रुवाणं न्यपतिं ययातिम् अष्टकः पुनरेवान्वपृच्छत्॥ नामाध्मर्हे सर्वगुणोप ४४॥
पन्नं यत्र स्थितं स्वर्गलो के यथा वत्॥ अष्टक उवाच॥ ये ये लोकाः पार्थिवेंद्र प्रधानास्त्वया भुक्ता येन कालेन यथा
व॥ तन्मे राजन्ब्रूहि सर्वं यथा वत्क्षेत्रज्ञवच्चापसे त्वं हि धर्मं॥ ययातिरुवाच॥ अहो हं मासं भुविसार्वभौमस्तेनाजो

कान्महानां वरन्वै॥ तत्रा वववर्षं वर्षमह स्यमात्रं ततो लो कं परमस्युपेन्दा॥ देवस्य देवस्यनिवसानेनविजित्य लोकन्या 83/1498
वसं ययेहं॥ मेष्ठ उसमाश्रि दत्तीः समा स्ने तुल्यप्रभावव्हरीश्वराणां तथा वसन्ने दने कामरूपी संवत्सराणामयुतं
त्ता नानां॥ सहा यगोभिविंचरन्स्यपगे धान्नगान्सुप्सितान्स्वागरू गंधरूपान॥ तत्रास्थि तं मां देवसुखे षु युक्तं कालेः
नीते महति ततोति मात्रं॥ दूतो देवानामब्रवीत्कामरूपो ध्वंसेत्युच्चैस्त्रिप्लुतेन स्वरेण॥ एतावन्मे विदितं राजसिं
हनतो भ्रष्टो हं नंदनात्क्षीणपुण्यः॥ वाचोश्रौषं चांतरिक्षे सुराणामनुक्रोशाच्छोचतां दानवेंद्र॥ अहो कष्टं क्षीण
पुण्यो ययातिः पतत्यसौ पुण्यकृत्पुण्यकीर्तिः॥ एवं ब्रुवस्य पन्मानतनो हं सतां मध्ये निपतेयं कथं नु॥ तेराख्या
तो यज्ञ भूमिं समीक्ष्य वेमां त्वरितमुपागतोस्मि॥ हविर्गंधं देशिकाज्जन्मभूमिं धूमापांगं प्रतिगृह्य प्रतीतः॥ इति
श्रीमत्स्यपुराणे ययातिचरिते ३८॥ अष्टक उ॰॥ यदावसन्नंदने कामरूपी संवत्सराणामयुतं शतानां॥ किंकारणं
कीर्तियुगप्रधान हित्वा त्वं वसुधामन्वपद्यतीयथाति॥ ज्ञातिः सुहृत्स्वजनो ये यथेह क्षीणो वित्ते मानवे संत्यजंतेहि
तथा च तं क्षीणपुण्यं मनुष्यं त्यजंति सद्यः सेश्वरा देवसंघाः॥ अष्टक उवाच॥ कथं तत्र क्षीणपुण्या भवंति मुह्यते तत्र मा
नोति मात्रं॥ कं के वसिष्ठाः कस्य धामोपयांति तन्मे ब्रूहि क्षेत्रवित्त्वं मतो मे॥ ययातिरुवाच॥ इमं भौमं नरकं ते पतं
ति लाल्प्यमाना नरदेव सर्वे॥ ते कंकगोमायुबलाशनार्थे क्षीणा विवृद्धिं बहुधा व्रजंति॥ तस्मादेतद्वर्जनीयं नरे
ण दुष्टं लोके गर्हणीयं च कर्म॥ आख्यातं मे सर्वं नमेवं भूयः सर्वं दानीं वद किं वदामि॥ अष्टक उ॰॥ यदा तु तान्वि

रुदंतेव यामिनथा गृध्राः क्षितिकंपापनं गाः ॥ नरा भवंति कथमात्र भवंति न भौम मनसं नरकं स्मृणोति ॥ यथानिरु०
उरुदेहान्कर्मणो जेन मानो यत्कं हृथिव्यामनुसंचरंति ॥ इमं भौमं नरकं पतंति नवैरूते वर्षपूगाननेकान ॥ षष्टि
सहस्राणि पतंति व्योम्नि यथा शास्त्रीतिं परं मेवक्ष्यराणि ॥ तान्वदंते पततः प्रती तेभीमान्भौमा राक्षसास्तीक्ष्णदंष्ट्राः ॥ अ
ष्टकउ० ॥ यदेनांस्ते मेननमुदेतिनीमाभौमराक्षसास्तीक्ष्णदंष्ट्राः ॥ कथं भवंति कथमात्र भवंति कथं भूता गर्भे भू
ताः भवंति ॥ ययातिः ॥ अष्टका मतः पुष्पफलानुपृक्तमन्वापिमघः स्तुरुषेस्टं ॥ तथैत स्मरजस्यापद्यते मुवैः स्व
र्गभ्रानःमस्तुपैति तत्र ॥ वनस्पतीश्चौषधीश्चाविशंति आपो वायुः पृथिवीयोनरिक्षं ॥ चतुष्पदं द्विपदं चापि सर्व
मेवं भूता गर्भभूता भवंति ॥ अष्टकउवा ॥ अन्यसंपूर्विदथामीह गर्भस्तुताहोस्वित्केनकामेन याति ॥ आपद्यमानो
नरयोनिमेतामाचक्ष्स तेन्नोत्र पृष्टउतसंशयीरदेहाभिसमृष्ट पांश्चक्षुः श्रोत्रलभने केन संज्ञा ॥ एतत्त्वं नः सर्व
मावक्ष्व पृष्टकः क्षेत्रकृत्वां तानतस्यामसवै ॥ ययातिः ॥ वायुः समुत्कर्षति गर्भयोनिं कृतौ रतः पुष्पः फलानुपृक्तां
सतत्र तन्मात्रकृताधिकारा क्रमेण संवर्धयतीह गर्भं ॥ जायमानोपगृह्य नगात्रः संज्ञामधिष्ठाय ततो मनुष्यः ॥ मत्स्य०
स्मृणोति श्रोत्राभ्यां वेदयतीह शब्दं सर्वरूपं पश्यति चक्षुषा च ॥ घ्राणेन गंधं जिह्वयाथो रसं च त्वचा स्पर्शं मनसा वेदनां च ॥ ४४
इत्यष्टकेहाविश्राम ह्यात्मानः प्राणभृतः शरीरे ॥ अष्टकउ० ॥ यः संस्थितः पुरुषो दह्यते वा निखन्यते वापि निध्य
तेच ॥ अभाव भूतः सविनाशमेत्य कथं माज्ञानं चेतयते पुरस्तात् ॥ ययातिरु० ॥ हित्वा सोऽसून्सुप्तवन्निष्टनित्वा पुरोधा

यसुकृतं दुःकृतं च ॥ अन्यां योनिं पुण्यपापानुसारां हित्वा देहं विशते राजसिंहः ॥ पुण्यां योनिं पुण्यकृतो विशंति पा
पा योनिं पापकृतो व्रजंति ॥ कीटाः पतंगाश्च भवंति पापा न मे विवक्षास्ति महानुभाव ॥ चतुष्पदा द्विपदाश्चैव षेचरत
थान्ये तथा गर्भभूता भवंति ॥ आख्यातमेतन्निखिलं न मयाच भूयस्तु किं पृच्छसि राजसिंह ॥ अष्टकउ० ॥ किं स्वित्कृत्वा
लभते तात लोकान्मर्त्यः श्रेष्ठान्तपसा विद्यया वा ॥ तीनेन पृष्टः सर्वमावेदयाशु शुभान् लोकान्येन गच्छेत्क्रमेण ॥ य
यातिरु० ॥ तपश्च दानं च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकंपा ॥ स्वर्गस्य लोकस्य वदंति संतो द्वाराणि सप्तैव महां
ति पुंसां ॥ नश्यंति मानेन तमोभिभूताः पुंसः सदैवेति वदंति संतः ॥ अधीयानः पंडितं मन्यमानो यो विद्यया हंति य
शः परस्य ॥ तस्यांतवंतश्च भवंति लोका न चास्य तद्ब्रह्मफलं ददाति ॥ चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छंत्यय था
कृतानि ॥ मानाग्निहोत्रमुत मौनमानमानेनाधीतमुत मानयज्ञः ॥ न मान्यमानो मुदमाददीत न संतापं प्राप्नुयाच्चावमा
नात् ॥ संतः सतः पूजयंतीह लोके नासाधवः साधुबुद्धिं लभंते ॥ इति दद्यादिति यजेदित्यधीते इति मे व्रतं ॥ इत्यस्मिन्
भयान्याहुस्तानि वर्ज्यानि नित्यशः ॥ येनाश्रयं वेदयंते पुराणं मनीषिणो मानसमानभुक्तं ॥ तन्निःश्रेय
सो रूपमेत्य परां शांतिं प्राप्नुयात्प्रेत्य चेह ॥ इति श्रीमत्स्यपुराणे ययातिचरिते ३९ ॥ अष्टकउ० ॥ चरन्गृहस्थः कथमे
ति देवान् कथं भिक्षुः कथमाचार्यकर्मा ॥ वानप्रस्थः सत्पथे संनिविष्टो बहून्यस्मिन्संप्रति वेदयंति ॥ ययातिरु० ॥ आहूताध्यायी गुरु
कर्मसु चोद्युक्तः पूर्वोत्थायी चरमं चोपशायी मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी ॥ धर्मागतं प्रा

85
1998

व्यधनेजयेनवद्याम्संदेवानिथिनोजघेद्य अनाददानस्वपंरेरदन्नतेषांगृहस्थोपनिषस्तुवाणि स्ववीर्यजीवी हजि
नाग्नि हृत्वा दाना परेभ्योनपरोपतापी नाहस्मुनिःसिद्धिमुपेतिमुख्यां वसन्नरण्येनियताहारचेष्टः अभिल्पजीवि
द्विनीहव्यनिस्त्रिजितेंद्रियासर्वतोविप्रमुक्तः अनोकसारीअधुलिप्यमानश्चरन्देशानेकचरस्थलिसुः राजा यथा
स्वामिरनास्वनीपमानवंतिकामामिजितानामुख नामेवरात्रिप्रपतेनविमानरण्यसंन्योनविंतुमनान्मा स्नोवह
वीनदन्नावापरंवज्ञानानध्यन्मानमध्ये कविता अरण्यवासीमुहूर्तेदधानिमुत्कान्तरण्येस्वन्नारीरधारन आह
कउवान कविमुदेवमुनयोमानानिकृतिनास्तुत भवंतीनिनदान्वन्वशोतुमिछामहेवयं ययातिरु० अरण्यं
वसतोयस्य ग्रामोनवतिपृष्ठतः ग्रामेवावसतोरण्यंसमुनिस्थान्नराधिप अष्टकउ कथंचिद्वसतोरण्येग्रामे
नवपृष्ठतः ग्रामेवावसतोरण्यंकथंनवतिपृष्ठतः अनग्निरनिकेतस्यादगोत्रचरणोमुनिः कौपीनाछादनं
यावत्तावदिछेच्चचीवरं यावत्प्राणाभिसंधानंतावदिछेच्चभोजनं नदाम्यवसतोग्रामेरण्येनवतिपृष्ठतः यस्तु
कामान्परित्यज्यत्यक्तकर्माजितेंद्रियः आतिष्टेतमुनिर्मौनंसमन्नोकेसिद्धिमाप्नुयात धौतदंतंकृत्तनखंसदास्नात मम्प०
मलंकृतं असितंसितकर्मस्थंकस्तनार्चितुमर्हति तपसाकर्शितःक्षामःक्षीणमांसास्थिशोणितः यदाभवतिनिर्द्व ४५
द्वोमुनिर्मौनंसमास्थितः अथलोकमिमंजित्वालोकंवाविजयेतपरं आस्येनतुयदाहारंगोवन्मृगयतेमुनिः अथ
स्यलोकःपूर्वोयःसोमृतत्वायकल्पते इतिश्रीमत्स्यपुराणेसोमवंशेययातिचरिते ४० कतरस्यतयोःपूर्वदे

वानामेतिसात्म्यतो उभयोर्धावतोराजन्सूर्याचंद्रमसोरिव ययातिरु० अनिकेतेगृहस्थेषुकामवृत्तेषुसं
यतः ग्रामावपस्वरनिकृष्टयोः पूर्वंगतः अप्राप्यादीर्घमायुस्तुयम्प्राप्नोतिकृतिनरेन तपसेतुयदिनकृ
त्वा चरेदन्यंनपस्तपः पत्रैन्क्रोमंततदपथ्यमाहुः तःप्रहितोसिराजन्तुनामस्वर्गीदर्शनीयस्तुवर्चाः कुतआगतः
कतमस्यांदिशिगन्ताउताहोस्विन्नस्यार्थिवंस्थानमस्ति ययातिरु० इमंभौमंनरकंक्षीणपुण्यःप्रवेष्टुमुर्वीगगना
द्विप्रकीर्णः उक्त्वाहंवःप्रपतिष्याम्यनन्तरंत्वरंतिमांब्रह्मणोलोकपाला अष्टकउ इछामित्वांप्रपतंतं
प्रपातेयदिलोकाःपार्थिवाःसंतिमेत्र यद्यंतरिक्षेयदिवादिविश्रिताः क्षेत्रज्ञंत्वांतस्यधर्मस्यमन्ये ययातिरु०
यावत्पृथिव्यांविहितंगवाश्वंसहारण्यैःपशुभिःपार्वतैश्च तावल्लोकादिवितेसंस्थितावैविजानीहितनरेंद्रसिं
ह अष्टकउ० तांस्तेददामिपततःप्रपातेयेमेलोकादिविराजेंद्रसंति यद्यंतरिक्षेयदिवादिविश्रुतास्तानाक्रम
क्षिप्रमरिंदमोहः ययातिरु० नास्मद्विधोब्राह्मणोब्रह्मविच्च प्रतिग्रहेवर्ततेराजमुख्याः यथाप्रदेयंसततंद्वि
जेभ्यस्तथाददेपूर्वमहंनरेंद्र नाब्राह्मणःकृपणोजातुजीवेद्यस्यापिस्याद्ब्राह्मणीवीरपत्नी सोहंयदेवाकृतपूर्वं
कृतन्तरविविकित्समानः किमुतत्रसाधु प्रतर्दनउ० इछामिस्वात्वांदृशरूपप्रतर्दनोहं यदिसंतिलोकाः यद्यं
तरिक्षेयदिवादिविश्रुतास्तवंत्वांतस्यधर्मस्यमन्ये ययातिरु० संतिलोकाबहवस्तेनरेंद्र अप्येकैकःसप्तसप्ता
न्यहानि मधुच्युतोघृतपृष्ठाविशोकास्तेनांतवन्तःप्रतिपालयंति प्रतर्दनउवाच तांस्तेददामिपतमानस्यराजन्मेम

87
1998

लोकास्तवन्ते वै भवन्तु यद्यंतरिक्षे यदि वादि विश्रिता स्तानाक्रमक्षिप्रमपेतमोहः ययातिरु० न तुल्यतेजाः सुकृ
तं कामये योगक्षेमं पार्थिवः पार्थिवः सन् दैवादेशादापदं प्राप्य विद्वांश्चरेन्नृशंसं हि न जातु राजा धर्म्यं
मार्गं चेतयानो यशस्यं कुर्यान्नृपो धर्ममवेक्षमाणः न मद्विधो धर्मबुद्धिः प्रजानन् कुर्यादेवं कृपणं मां यथात्
थ कुर्यामपूर्वं न कृतं यदन्यैर्विवित्समानः किमु तत्र साधु ब्रुवाणमेवं नृपतिं ययातिं नृपोत्तमो वसुमनाः
प्रब्रवीत्तं यतिश्रीमम्पुराणो मोमवंशो ययातिर्विरते ॥ ५० ॥ वसुमनाउवाच पृच्छाम्यहं वसुमना रौषदश्व
र्यद्यस्ति लोको दिवि मह्यं नरेंद्र यद्यंतरिक्षे प्रथितो महात्मन्क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ययातिरुवाच यदंतरि
क्षं पृथिवी दिशश्च यत्तेजसा तपते भानुमांश्च लोकास्तावंतो दिवि संस्थिता वै ते ते तवानंताः प्रतिपालयंत
दिशमम्यकाउ०ह: ययातिरु० न तां वाचा हृदयेनापि कृत्स्नरीपसमानोनावस्थानरेंद्र नेमातं नेदिविश्वकाश्चिता
स्ते विशुद्धपाःस्ववनं तो महांतः शिबिरुवाच तांस्त्वं लोकान्प्रतिपद्यस्व राजन्क्षा धास्वाम्यदि शुक्रं क्रय्यं न
चाहं तान्प्रतिपद्येय दत्तायस्मिन्नलोकान्मिहास्थान्मलोके ययातिरु० यथा त्वमिंद्र तिमप्रजावसे क्रय मप०
नंत्वा नरेंद्र वलोकाः तथाप्यलोको नररेवमेस्य दद्ध तस्मात्रिबेनाज्ञितं तामिवान्यं अष्टकउ० नचेत्कंकत्यार ४६
लोकान्नः प्रतिनंदसि सर्वे प्रदाय भवते गंतानारो नरकं वयं ययातिरु० यदर्हाय ददिध्वं मे तत्समाददः
क्षीनः अहं तु नाभिजानामि यत्कृतं न मया पुरा आलिप्समानस्य तु मे यदुक्तं न तत्तथास्तीह नरेन्द्रसिंह अस्मास

89
1998

दानस्य यदैव युक्तं तस्मै ददानं न फलप्रदिशे अष्टकउ० कस्यैते प्रतिदृश्यंते रथाः पंचहिरण्मयाः श्रुतस्यैते षु
उच्चैःसंतःप्रकाशंते ज्वलंतोग्निशिखा यथा ययातिरु० भवतां मम चैवैते रथा यास्यंति हिरण्मयाः आरुह्यैते
षु गंतव्यं भवद्भिश्च मया सह अष्टक अष्टकउ० आतिष्ठस्व रथं राजन्विक्रमस्व विहायसा वयमप्यनुयास्यामो यदा
दा कालो भविष्यति ययातिरु० सर्वैरिदानीं गंतव्यं सह स्वर्गजितो वयं एष वो विरजाः पंथा दृश्यते देवसद्मगः
वैशंपायनउवाच तेधिरुह्य रथान्सर्वे प्रयाता नृपसत्तमाः आक्रमंतो दिवं भाभिर्धर्मेणावृत्य रोदसी अष्टक उवाच अहं मन्ये पू
र्वमेकोस्मि गंता सखा चेंद्रः सर्वथा मे महात्मा कस्मादेवं शिबिरौशीनरोयमेकोत्यगात्सर्ववेगेन वाहान् ययाति
रु० अददाद्देवयानाय यावद्वित्तमविंदत उशीनरस्य पुत्रोयं तस्माच्छ्रेष्ठो हि वः शिबिः दानं तपः सत्यमथापि धर्मो ह्री
मा क्षाः श्रीः धृतिः क्षमा नंतेनैतान्यप्रमेयाणि राजन् शिबौ स्थितान्यप्रतिमे सुबुद्ध्या एवं वृत्तो ह्रीनिषेधश्च यस्मा
त्तस्माच्छिबिरत्यगाद्वै रथेन वैशंपायनउ० अष्टकः पुनरेवान्वपृच्छन्मातामहं कौतुकादिंद्रकल्पं पृच्छामि त्वां न
पते ब्रूहि सत्यं कुतश्च कस्यासि सुतश्च कस्य कृतं त्वया यद्धि न तस्य कर्ता लोके त्वदन्यः क्षत्रियो ब्राह्मणो वा यया
तिरु० ययातिरस्मि नहुषस्य पुत्रः पूरोः पिता सार्वभौमस्त्विहासं गुह्यं मंत्रं मामकेभ्यो ब्रवीमि मातामहोहं भवतां
प्रकाशः सर्वामिमां पृथिवीं निर्जिगाय प्रस्थे बद्ध्वा ह्यददं ब्राह्मणेभ्यः मेध्यानश्वानेकरूपान्सुरूपांस्तदा देवाः पुण्यभा

ज्योभवंति ऋषाल्स्य हां दृष्टिवी व्रात्स्यणोस्य: सर्वाभिमामखिलोमर्वरत्नैः गोभिः सुवर्णैश्च धनैश्च सुरभैःतथासंगताश्च
नन्याश्च सुरानि सत्येन मे यो श्च वसुंच नये वावाभिर्जल्पते मानुषेषु न हश्या व्याहतेचैकवाकोस स्यं हि संतः प्रतिष्ठ
ज्यंति माधुष्कंप्रब्रवीमी हस्म संप्रतहेनेतां यदाश्चितथैवच सर्वेश्च देवा मुनयश्च लोकाः स यस्य नष्टं जगार
तिमे मनागतं यो नःस्व धेम्य गाजितां समाद्रं निवेदयेत अनसूसु द्विजावेम्यः सनजेन सलोकतां यौन कलवा०
त वं राजन् स महात्मा स याति स्वर्दो हिं ते स्मारितो मित्र सार्दः सत्का महीपरमोदार कर्मा स्वर्गं ततः कर्मनिओष्य
दृष्ट्वीत वं मया विस्तरतो यथा दास्यातं तेन्वरितं नाकृषस्य वंशो यमस्य हष्यितः कौरवे यो यस्मिन्जातस्य मनु
जेंद्र कल्पः इति श्रीमत्स्यपुराणे सोमवंशे ययातिचरिते समासे ४२ सूत उ० इत्येतच्छौनकाद्राजा शतानिकोनि
शम्य तत् विस्मितःपरया प्रीत्या पूर्णचंद्र इवाबभौ पूजयामास नृपतिर्विधिवच्चाथ शौनकं रत्नैर्गोभिःसुवर्णैः
श्च वासोभिर्विविधैस्तथा प्रतिगृह्य ततःसर्वं यद्राज्ञा प्रहितं धनं दत्वा च ब्राह्मणेभ्यश्च शौनकोंतरधीयत मत्स्य०
ऋषय ऊचुः ययातेर्वंशमिच्छामःश्रोतुं विस्तरतोऽनघ यदुप्रभृतिभिः पुत्रैर्यदा लोके प्रतिष्ठितः सूत उ० यदोर्वंशं प्र ४७
वक्ष्यामि ज्येष्ठस्योत्तमतेजसः विस्तरेणानुपूर्व्या च गदतो मे निबोधत यदोःपुत्रा बभूवुर्हि पंच देवसुतोपमा मह
रथा महेष्वासा नामतस्तान्निबोधत सहस्रजित् ततो ज्येष्ठः क्रोष्टुर्नीलोजिकोलघुः सहस्रायसुदायादाशतजिन्

नाम पार्थिवः शतजितेऽपि दायादास्त्रयः परमकीर्तयः हैहयश्चैव तथा तेन हयश्च यः हैहयस्य तु दायादो ध
र्मनेत्र प्रतिश्रुतः धर्मनेत्रस्य कुंतिस्तु संहतस्तस्य चात्मजः संहतस्य च दायादास्त्वाग्नेलोकविश्रुताः कृतवीर्यः
कृताग्निश्च कृतधर्मा तथैव च कृतौजाश्च चतुर्थोऽभूत् कृतवीर्यात्तु सोऽर्जुनः जातः करसहस्रेण सप्तद्वीपेश्वरो नृ
पः वर्षायुतं तपस्तेपे दुश्चरं पृथिवीपतिः दत्तमाराधयामास कार्तवीर्योऽत्रिसंभवं तस्मै दत्तो वरास्तेन चत्वा
रः पुरुषोत्तमः पूर्वं बाहुसहस्रं तु सवव्रे राजसत्तमः अधर्मं चरमाणस्य सद्भिश्चापि निवारणं युद्धेन पृथिवीं जि
त्वा धर्मेणैवानुपालनं संग्रामे वर्तमानस्य वधश्चैवाधिकाद्भवेत् तेनेयं पृथिवी सर्वा सप्तद्वीपा सपर्वता समोद
धिपरिक्षिप्ता क्षात्रेण विधिना जिता यज्ञैर्बहुसुवर्णैर्वा यजतस्तस्य धीमतः रथो ध्वजश्च संजज्ञे इत्येवमनुशुश्रुमः द
श यज्ञसहस्राणि राज्ञां द्वीपेषु वै तदा निरर्गला निवृत्तानि श्रूयंते तस्य धीमतः सर्वे यज्ञा महाराज तस्यासन् भूरि
दक्षिणाः सर्वे कांचनयूपास्ते सर्वे कांचनवेदयः सर्वे देवैः समं प्राप्तैर्विमानैः स्वरलंकृतः गंधर्वैरप्सरोभिश्च
नित्यमेवोपशोभितः यस्य यज्ञे जगौ गाथां गंधर्वो नारदस्तथा कार्तवीर्यस्य राजर्षेर्महिमानं निरीक्ष्य सः नूनं
न कार्तवीर्यस्य गतिं यास्यंति पार्थिवाः यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च स हि सप्तसु द्वीपेषु खड्गी चक्री श
रासनी रथी द्वीपान्यनुचरन् योगी पश्यति तस्करान् पंचाशीतिसहस्राणि वर्षाणां स नराधिपः सर्वरत्नसमं प्राप्तः
चक्रवर्ती बभूव ह स एव पशुपालोऽभूत् क्षेत्रपालः स एव तु स एव वृष्ट्या पर्जन्यो योगित्वाद्दर्जुनोऽभवत् योऽसौ बाहुसह

91
1948

स्रेण उग्रायानकविनत्वच ॥ नातिरश्मिसहस्रेणाभार दारवनास्करः ॥ एषराजा मनुष्येषु माहिष्मत्यां महाद्युतिः क
र्कोटकसुतंजित्वा पुत्रीनत्रनिवेश्ययेत् ॥ एष खङ्गं समुन्नम्य प्राह कालेनजेतवे ॥ कौउत्रिमुखोसिन्नः प्रतिश्रो
तो महीपतिः ॥ एषनाक्रीडितास्नेन प्रतिस्रग्दाममालिनी ॥ यस्यभ्रुकुटिसंत्रासाछंकिनास्येतिनर्मदा ॥ एकोभुज
सहस्रेण जग्राह सं महार्णवं ॥ करोत्सुहृतवेगांतुनर्मदांप्राहहुह्नां ॥ तस्य बाहुसहस्रेण क्षोभमाने महोदधौ
भवेस्यातीर्नानिश्चेष्टापातालस्था महासुराः ॥ स्थलीकृत्य महीं वाल्वालीनमीनमहातिमिः ॥ मारुताविद्धफेनौ
घमावर्त्तक्षिप्तदुःसहे ॥ करोत्यालोडयन्नेव दोःसहस्रेण सागरं ॥ मंदराक्षोभचकिता ह्यमृत्योत्पादशंकिताः ॥ तदा
तिन्नमूर्द्धानोनवतिष्ठ महोरगाः ॥ सायाह्ने कदलीखंडा निवातस्तिमिता इव ॥ एष बद्ध्वा धनुर्ज्यायामुच्छिन्न
पंचभिः शरैः ॥ लंकायां मोहयित्वा तु सबलं रावणं बलात् ॥ निर्जित्य बद्ध्वा चानीय माहि[illegible] भवन
तो गत्वा पुलस्त्यस्तु अर्जुनं संप्रसादयन् ॥ मुमोच रक्षः पौलस्त्यं पुलस्त्येनेह संमितं ॥ तस्य बाहुसहस्रस्य बभूव
ज्यातलस्वनाः ॥ युगांतानलसहस्रस्य अस्फोटाशनेरिव ॥ अहो चित्रं बत वीर्यं भार्गवो यच्छिन्नं तदे मत्स्य०
महस्रबाहुर्वनं तालवनं तथा ॥ यत्र बद्ध्वा सुसंविग्नो ह्यर्जुनं मोक्षयन्प्रभुः ॥ यस्माद्दर्पं प्रदर्प्य ये विस्मृतं मम हे ४८
हृय ॥ तस्मात्तु दुष्करं कर्म कृतवद्दैमन्यो हरिष्यति ॥ अर्जुनो नाम कौंतेयो नच राजा न विष्यति ॥ छित्वा बाहुसह
स्रं तेप्रमथ्य तपमा बली ॥ तपस्वी ब्राह्मणस्त्वां स वधिष्यति नार्गवः ॥ तस्य रामं न दाता मीन्मस्तु शापेन धीमतः

93
1995

वरंश्चैवं तु राजर्षिः स्वयमेव स्वतःपुरा ॥ तस्य पुत्रशतान्यासील्लवचत्रमहारथाः ॥ कृतास्त्रा बलिनः शूरा धर्मात्मानो म
हाबलाः ॥ शूरसेनश्च शूरश्च धृष्टोक्तः कृष्ण एव च ॥ जयध्वजश्च वै कर्त्ता अवंत्यश्च विशांपते ॥ जयध्वजस्य पुत्रस्तु ताल
जंघो महाबलः ॥ तस्य पुत्रशतान्येव तालजंघा इति श्रुताः ॥ तेषां पंचकुलान्यासन् हैहयानां महात्मनां ॥ वीतिहो
त्राश्च सार्यातास्तोजाश्चावंतयस्तथा ॥ कुंडकेराश्च विक्रांतास्तालजंघास्तथैव च ॥ वीतिहोत्रसुतश्चापि आनर्तो ना
म वीर्यवान् ॥ दुर्जयस्तस्य पुत्रस्तु बभूवामित्रकर्षणः ॥ सद्भावेन महाराज प्रजा धर्मेण पालयन् ॥ कार्त्तवीर्योऽर्जुनो
नाम राजा बाहुसहस्रवान् ॥ येन सागरपर्यंता धनुषा निर्जिता मही ॥ यस्तस्य कीर्त्तयेन्नाम [illegible] मानवः
न तस्य वित्तनाशः स्यान्नष्टं च लभते पुनः ॥ कार्त्तवीर्यस्य यो जन्म कथयेदिह धीमतः ॥ यथा यष्टा यथा दाता स्वर्गलोके म
हीयते ॥ इति श्रीमत्स्यपुराणे यदुवंशो ४३ ऋषय ऊचुः ॥ किमर्थं तद्वनं दग्धं भार्गवस्य महात्मनः ॥ कार्त्तवीर्ये
णाविक्रमस्य तत्र वद सूतमो ॥ रक्षितासतु राजर्षिः प्रजानामिति नः श्रुतं ॥ स कथं रक्षिणो भूत्वा अदहत्तत्तपोवनं ॥ सूत
उवाच ॥ आदित्यो द्विजरूपेण कार्त्तवीर्यमुपस्थितः ॥ तृप्तिमेकां प्रयच्छस्व आदित्योऽहं नरेश्वरः ॥ राजोवाच ॥ भगवन्केन
तेन तृप्तिर्भवति वद दिवाकर ॥ कीदृशं भोजनं दद्यां श्रुत्वा तु विदधाम्यहं ॥ आदित्य उवाच ॥ तुष्टस्य दत्तं राजन् दयितं
यान्सर्वतो मुख्यान् ॥ यत्र शोष्याम्यहं सर्वं तेन तृप्तिर्भविष्यति ॥ आदित्य इम मतेजोभिः शोषयिष्यति स्थावरान्
शुष्कान् समर्थकोपेन पश्चाद्धक्ष्यति नराधिप ॥ सूत उवाच ॥ ततः शरानादितस्य तत्त्वेनाग्रमयोजत ॥ ततो ददाह सं

प्राग्नान्स्थावरान्सर्वान्गच्छ मध्याग्रामाश्रमांश्च घोष्याणि नगराणि च॥ तपोवनानि रम्याणि वनान्युपवनानि च
गर्वं सर्वं समदहत्तं तःसमवीक्ष्य पक्षिणः॥ निर्दग्धानि स्मृणान्भूमि हुताशो रेणातेजसा॥ एवमस्मिन्भवकालेतु आप
वोजल्ममाप्स्यितः॥ दशवर्षसहस्राणि तन्नास्ते समहाद्युतिः॥ हृतं पूर्वं महातेजा उदितिहत्रपोधनः॥ सोम्भ्यप
दाश्रमे दग्धमर्जुनेन महामुनिः॥ क्रोधाच्छन्नापराजर्षिः कीर्तिमद्वीपपातनः॥ क्रोधेन्द्रः एवह राजेन्द्रं वंशस्मुत
मपुरूपं॥ यस्मान्नयोप मंत्रतो विस्तु ह्रस्विकुलो रुद्र॥ क्रोधेरे बाभवत्पुत्रो हृजिनी वान्महारथः॥ हृजिनीवंत
वंश्यपुत्रो नक्ष्या होनाम महाबलः॥ स्वाह पुत्रोनवराजन्नयंशुर्वदतां वरः॥ मनत्सम्मूतिनिर्गच्छन्वेभयंगुसोम्य
मान्मनः॥ चित्रविचित्ररथस्वास्यसुतकर्मनिरुन्धितः॥ अथचैत्ररथो वीरो जज्ञे विपुलदक्षिणः॥ [illegible]
नश्वक्रवर्ती वभूव ह॥ अत्रानुवंशश्लोको यं गीतस्तस्मिन्पुरा नव न॥ [illegible]
धीमनिच्छानि रूपाणां हरिद्विणनेजसां॥ तेषां मतिप्रधानानां पृथुसत्त्वमहाव[illegible] ॥मन्य॰
पृथुधर्मा पृथुजयाः पृथुकीर्तिः पृथुनामाः राजानरान्त्राविंदवः॥ [illegible] ॥धय॥
मुपनन्यस [illegible] आनानुसुय[illegible] पृथिवीमिमां॥ आनं [illegible] मेधानां [illegible]
धर्मिकः॥ निमित्तुरनवस्तुनसुतानःआनुतापनः॥ महत्तमस्मतनयो राजर्षिणाम[illegible] आसीन्मरुत्तनन्यो
रकं बलबर्हिषः॥ पुत्रस्तु रुक्मकवचो विद्वान्केवलबर्हिषः॥ निहत्य रुक्मकवचः [illegible] कवचधारिणः॥

विविधं वाणैरवाप्य पृथिवीमिमां॥ अश्वमेधे ददौ राजन्ब्राह्मणेभ्यस्तु दक्षिणां॥ यज्ञेऽथ रुक्मकवचः कदाचित्स 95
रवीरहा॥ जज्ञिरे पंचपुत्रास्तु महावीर्याः धनुर्भृतः॥ रुक्मेषु पृथुरुक्मश्च[illegible]परिघो हरिः॥ परिघं च हरिं 1998.
श्व वविदेहेष्वाप यत्पिता॥ रुक्मेषुरनवद्राजा पृथुरुक्मस्तदाश्रयः॥ तेभ्यः [illegible] श्रमोसत्रानुसामेधस्य सदाश्र
मे भग्नांतश्चाश्रमस्यश्च ब्राह्मणेनाववोधितः॥ ज्यामघस्य गतस्य देशसमं धुञ्जीरथी नर्मदानूपमेकाकी
केवलं हन्निफामतः॥ मह्यवंतगिरिं हत्वा च मत्स्यरूपात्यिज्ञात॥ ज्यामघस्याभवत्सा [illegible] व्यापरिशितामसीप्र
नोन्यच स ज्यामाना र्यामस्यानविंदने॥ तस्यामीद्विजयेयुद्धे तत्रकन्या मवाप्य सः॥ भार्यासुवाच संत्रासात्ते नाकन्या
सुलोचना॥ भार्यायेतु समानीताकथयस्वेति लंघयत॥ माहेश्वरस्तु पुत्रेणनाम्यापत्नीनवन्म स्नुषायं ते भन्नस्नेन
कृतमेनस्तुतेनने॥ भार्या सुवाच पत्नीमस्नुषेयं ते सुचिस्मिते॥ एवमुक्ता ब्रवीदेनं कस्य चेयं स्नुषेति च॥ राजोवा
यत्त्वं जनिष्यसे पुत्रे तस्य नार्या भविष्यति॥ तस्मात्तेन समोग्रेण कन्यायाः संप्रसुषाते॥ पुत्रं विदर्भं सुषगाशैव्यापरिणि
तासमी राजपुत्री मुदिताः सा स्नुषयाकथ्यकं कन्यां॥ लोमपादं च तीयं तु पुत्रं परमधार्मिकं॥ तस्मां विदर्भाज्जन प
नप्तुत्रा नरशगन विशारदान॥ लोमपादान्मजपुत्रो ज्ञातिस्तस्यस्वजात्मजः॥ कौशिकस्य विदिः पुत्रस्तस्माद्द्वैद्यान्म
पान्मभूतः॥ क्रथो विदर्भपुत्रस्तु कुंतिस्तस्मान्मजोनवन्॥ कुंतेर्धृष्टः सुतोजज्ञेरणधृष्टः प्रतापवान्॥ धृष्टस्य पुत्रो ध
र्मान्मानिर्वृत्तः परवीरहा॥ नरिर्वृतेनिर्वृतेः पुत्रो नाम्नाम विदूरथः॥ दशार्हः पुत्रो व्योमस्तु व्योमाज्जीमूत उच्यते जीमूत

पुत्रो विमलस्तस्यासीन्महारथः सुतो भीमरथस्तस्यासीत्सुतो नवरथः किल तस्याप्यासीद्दशरथः शकुनिस्तस्

यात्मजः तस्मात्कारंभारिर्देवरातो बभूव ह देवक्षत्रोभवज्जातो देवरातो महायशाः देवगर्भसमाजस्ते

देवनक्षत्रनंदनः मधुर्नाम महातेजा मधोःपुरुवरस्तथा आसीत्पुरुवसः पुत्रः पुरुद्वात्पुरुषोत्तमः यंतुजंते

द्वैदर्भीभद्रसेनो पुरुद्वतः ऐक्ष्वाकी चाभवद्भार्या सत्वतस्तस्यामजायत सात्वतः सत्वसंयुक्तः सात्वतो कीर्त्ति

वर्द्धनः इमां विसृष्टिं विज्ञाय ज्ञामेघस्य महात्मनः प्रजावानभियायोऽपि राजा सोमस्य धीमतः सात्वतान्स

त्वसंपन्नान् कौशल्या सुषुवे सुतान् भजिनं भजमानं तु दिव्यं देवावृधं नृपः अंधकं च महाभोजं वृष्णिं च यदुनं

दनं तेषां च सर्गाश्चत्वारो विस्तरेणात्र तान् भजमानस्य सृंजय्यां बाह्यकायां च बाह्यकाः [illegible] बाह्य

तस्तुतदा नवत तस्य भार्ये तामिमो देवावृधो नाते बहवस्तु तान् निमिंच कृमिलं चैव वृष्णि [illegible] जय ते [illegible] काया मे

सर्जीनि जमानाद्विजज्ञिरे जज्ञे देवावृधो राजा बंधूनां मित्रवर्द्धनः अपुत्रस्त्वभवद्राजा [illegible] परमं तप पुत्रः सर्व

गुणोपेतो मम स्यादिति निश्चयः संयोज्य मंत्रमेवाथ वर्णायां जलमस्पृशत् [illegible] कारहिता पंचाश० ५०

पगाः कन्याया त्वात्पुरपर्णेन तस्मिन्मानिम्नगोत्तमा चिंतयाय परिताका जगाम [illegible] जाधिगच्छाम्यहं नारी म

स्यामेवं विचंतु तः येन स्याम पत्या हेनं वमपसहस्र जा अथ भूत्वा कुमारी स [illegible] नापरमे वपुः ज्ञापयामास

जानं तामियेषं महाभुजः अथ सा नवमे मासि सुषुवे सरितां वरा पुत्रं सर्वगुणोपेतं बभ्रुं देवावृधात्तथा अनुवं

शेपुराणज्ञा गायंतीति परिश्रुता गुणान् देवावृधस्याथ कीर्त्तयंतो महात्मनः यथैव शृणुमो दूरात्संपश्यामस्तथां

तिकात् बभ्रुःश्रेष्ठो मनुष्याणां देवैर्देवावृधः समः चतुःषष्टिशतं पुरुषंसहस्राणि [illegible] प्सति तेऽमृतत्वं संप्राप्ता बभ्रो

र्देवावृधान्नृपात् यज्वा दानपतिवीरो ब्रह्मण्यश्च दृढव्रतः रूपवान्सु महातेजा [illegible] वीर्यधरस्तथा सुतना

नस्य दुहिता सुषुवे चतुरःसुतान् कुकुरं भजमानं तु सत्रीं कंबलबर्हिषं कुकुरस्य सुतो धृष्णु [illegible] धृष्णोस्तु तनयो धृतिः

कपोतरोमा तस्याथ तैत्तिरिस्तस्य चात्मजः तस्यासीत्तु रगःपुत्रः सखा विद्वान्नलः किल [illegible] तस्य [illegible] नं

दनोदरदुंदुभिः तस्मिन्प्रवितते यज्ञे अभिजातः पुनर्वसुः अश्वमेधं तु पुत्रार्थमाजहार नरोत्तमः तस्य [illegible] तिरा

त्रस्य मध्यात्समुत्थितः अतश्च विद्वान्कर्मज्ञो यज्वा दाता पुनर्वसुः तस्यासीत्पुत्रमिथुनं बभूवा [illegible] नं किल

आहुकश्चाहुकी चैव ख्यातो मतिमतां वरः यमौ यत्र [illegible] उरसत्र श्लोको भवति माहुकः सोपसंतान कर्णाम

धजानां वरूथिनां तथा मेषपोषाणां सहस्राणि दशैव नासमस्त्वथ दी नातेजा नायज्वीना सहस्रदः ना शुचि

नाप्यविद्वांश्च भोजेष्वभ्यजायत आहुकस्य भृतिं प्राप्ता इति सेतंदेतद्वने आहुकस्याप्यवंतीषु स्वसारं

चाहुकीं ददौ आहुकात्काश्यदुहिता द्वौ पुत्रौ संबभूवतुः देवकश्चोग्रसेनश्च देवगर्भसमावुभौ देवकस्य सुता

वीरा जज्ञिरे त्रिदशोपमा देववानुपदेवश्च सुदेवो देवरक्षितः तेषां स्वसारःसप्तासन् देवकस्यात्मजा ददौ देवकी

श्रुतदेवा च यशोदा च धरा श्रीदेवी सत्यदेवी च सुनामा चैवेति सप्तमी नवोग्रसेनस्य सुताः कंसस्तेषां तु पूर्वजः न

प्रोथस्य सुता मान्धं कं कान्तं कन्यन्यमः सुतं तु गास्तु पालस्य सुव सुा सिमुष्टिदः तेषां स्वसार पंचाया त्कंसा कंसव
ती तथा सतं तू राष्ट्रपाली च कंका चेति वरांगनाः उग्रसेनः सहापत्यो व्याख्यातः कुकुरोद्भवः न जमानाम पुत्रोथर
थ्यो सुरथो विदूरथः राजा वै देवरथस्य विदूरथसुतो नव राजाधिदेव सुतौ ज्ञाते देवसमस्थितौ नियम
व्रतप्रधानौ शोणाश्वः श्वेतवाहनौ शोणाश्वस्य सुताः पंच शूरा रणविशारदाः शमी च गदवर्मा च निकृतः शक्र
शत्रुजित् शमीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः प्रतिक्षत्रसुतो भोजो हृदिकस्तस्य चात्मजः हृदिकस्याभवन्
पुत्रा दशाभीमपराक्रमाः कृतवर्माग्रजस्तेषां शतधन्वा च मध्यमः देवार्हश्चैव नाभश्च भीषणश्च महाबलः
अजातो वनजातश्च कनीयक करंबकौ देवार्हस्य सुतो राजन् कंबलबर्हिषः असमंजाः सुतस्तस्य तमोजा
स्तस्य चात्मजः अजातपुत्रस्य सुतौ प्रजायेतमसमायतौ तमायपुत्रा विक्रांतास्त्रयः परमकीर्त्तयः सुदंष्ट्रश्च सु
नाभश्च कृष्णस्त्वनुकंपितः अंधकानामिमं वंशं कीर्त्तयेती वनित्यशः आत्मनो विपुलं वंशं प्रजावान् जायते
नरः इति श्रीमत्स्यपुराणे सोमवंशे ४४ सूत उवाच गांधारी चैव माद्री च क्रोष्टुभार्ये बभूवतुः गांधारी जनयामास मत्स्य०
माससुमित्रं मित्रनंदनं माद्री युधाजितं पुत्रं ततो वै देवमीढुषं अनिमित्रं शिविं चैव पंचात्र कृतलक्षणा अनिमि ५२
त्रसुतो निघ्नो निघ्नस्यापि सुतावुभौ प्रसेनश्च महावीर्यः शक्तिसेनश्च तावुभौ स्यमंतकः प्रसेनस्य मणिरत्नमनुत्त
मं पृथिव्यां सर्वरत्नानां राजसोऽभवन्मणिः हृदि कृत्वा तु बहुशो मणिं तं स प्रजायते गोविंदो न तन्लेभे शक्तोपि

न तं हरते कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः जगाम हं समनुवा वा बिलं ता हेतुरं तं [illegible] विप्रसर्व कृप
सेनोन वेक्षते प्रसेनं च तदा ऋक्षः ऋक्षं चापि प्रसेनजित् हत्वा ऋक्ष प्रसेनं तु ततस्तं मणिं [illegible] कृप
नत्वं तबिलमगात्ततः प्रसेनं तु हतं ज्ञात्वा गोविंदपरिशंकितः गोविंदेन हतो व्यक्तं प्रसेनो मणिकारणात् [illegible] वि
दस्तु गतोऽभूतपं मणिरत्नेन भूषितं तं दृष्ट्वा संगतस्तेन गोविंदः प्रत्युवाच ह तमिंद्र [illegible] चारं ऋक्षस्य [illegible] दिष्टान 99/1998
सु अपसदीर्घेण कालेन भगवानिर्गतः प्रभुः य दृष्टवान गोविंदो बिलस्यास्य समागमं तं ऋक्षं सुमहाबाहं
सचक्रेऽल्कवान्हृया ग हत्वा तु गोविंदः स्वस्कन्धामिः प्रविवेश च अपश्यत्जांबवंतं तु ऋक्षराजं महाबलं ततः
ऋक्षकृष्णयोरभवद्युद्धं महाबलं जांबवंतं सुतं प्राह कोधमस्कंधोवनः दृष्ट्वा तेन तदा ऋक्षः कर्मनिर्वी
स्वेदः प्रभुं ततः स्तुत्वा स्तुतवान्नक्रेणाव मताउपय चक्रप्रहारेण विनो त्वत्तो हे मरणं विनो कन्याप्रीदाम
मस्तानं रत्नं समाप्नुयात् योयं मणिः प्रसेनात्तु दत्वा प्राप्तो मया विनो ततः संजांबुवंतं समणिं प्राप्य
बिलस्य वै ददौ सत्राजिता ये नं सर्वसात्वतसंसदि तनं मिथ्यापवादेन मंतप्रायतयाविशीः ततस्तेभ्या दवात्स वै
वासुदेवं तदा ब्रूवन् अस्माकं मन्नसि वासास्त्र सेनस्तु वध्याद्दत्तः कैकेयोसौ ददौ नामो दशपुत्रा सतः सुताः
म सुपन्नास्तु नाः सुयुस्सर्वेला कंपुविस्तुताः ख्यातिगत्नाम हासत्वानं गकाशनु हर्वजाः अथ ब्रतवती तस्या इंग
काशनु हर्वजाः सुपुत्रैसाक्तमा यांतु विप्राक मन्त्रलोचनाः सस्यभामा च मा स्त्रीणां व्रतनीयह दब्रताः तयाप

यवतीं चैव तां श्वफल्कायमाददौ अनमित्राच्छिनिर्जज्ञे कनिष्ठाद्वृष्णिनंदनात् सत्यवांस्तस्य पुत्रस्तु सात्यकि
स्तस्मात्सात्मजः भवस्य वा युयुधानस्य मितेनस्य प्रतापवान् असंगो युयुधानस्य भूतिस्तस्यात्मजोऽभवत् दुनेरसत्व
पुत्ररतिरोभ्याप्रकीर्तितः अमित्रान्वयो ह्येव व्याख्यातो वृष्णिवंशजाः अपुत्रममेनः पृथ्वी वीरो युधाजितः अ
न्योऽनुनन्दो वीरोऽस्य वृषभः क्षत्र एव च ऋषभः काशिराजस्य सुतां भार्यामविंदत जयंतस्य जयंत्यानुपुत्रास मभ
वत्ततः सदायज्वानि वीरश्च श्रुतवान्मतिमिप्रियः अक्रूरः सुषुवे तस्मात्सदायज्वानि दक्षिणाः रत्ना कन्या च शै
व्यस्य अक्रूरस्तामवाप्तवान् पुत्रानुत्पादयत्तस्यामेकादश महाबलान् उपलंभं सदालंभं उत्कलं चार्यमेव
मः सितीतरं सदापक्षं मृंगतुंबारुमेव च सुधर्मं धर्म मंधृग्धर्मा वधमौनीनश्चैव च सर्वे च प्रतिहोतान्वरत्नाभो ज
त्रिरे सुतान् अक्रूरादुग्रसेनायां सुतौ द्वौ कुलनंदनौ देवरानपदेवश्च जज्ञाते देव[illegible]तो [illegible]वततः
पुत्राः पृथुर्विपृथुरेव च अश्वत्थामा च बाहुश्च सुपार्श्वकगवेषणौ वृष्णनेमिः सुध[illegible]ध्मी[illegible] मत्स्य०
स्त्रन्मिर्वेऊत्र मिश्वजामिं द्वाश्च वशाश्चया इमां मिश्रनानिहाधायां देवकुरुस्या [illegible] नव्यानि[illegible] ५२
अनिन्ना नामिकेनचित् स्मृतश्च वा रुस्वाकी सुषुवे शूरं श्यानमभ्र तमीहशो [illegible] रुक्कुरु [illegible]
कमः माद्रवत्सा च जनिता वत्त्रिंस्यामिति सुषुमः नकुलसहदेवश्च रूपव[illegible]
श्यानमानकदुंदुभेः लेनेऽपि कंसुतेरां मंस्तुन्नेऽपिंडे महाहनु चित्रकेनेकुमारो [illegible] मेजा [illegible]स्मा [illegible]

तिरे सूरिः सूरवेणकीर्तिमानपि उदासीन इमेनश्च ऋषिदासमत्यैव च पशोन इविरहस्य कः [illegible]ःसर्वानयानयन्
प्रथमायामसमावाम्यां वार्षिकीलुन विष्यति तस्मांजज्ञे महाबाहुः पूर्व[illegible]मः [illegible] अनुजात्वभवत्कृष्ण
सुभज्ञान इभाषिणी देवकांसु महाते जाज्ञेन्द्रशभवेसस्वा मददेवसुत[illegible]जसे[illegible]राजकुलोद्भवः उपा 101/1998
संगंधरस्लेनेतनयं देवरक्षिता एकानंत्राणवसुनागाकंसस्थानस्यापातयन् [illegible] नंच वर्षनेऽपि
वर्ल गते सर्वे महात्मान उपदेव्याः प्रजज्ञिरे अंगावदे महात्मानरंकदेव्याव्यजा[illegible]रि[illegible]देव्याःस्[illegible]तेन
दको नामनामतः सममं देवकीपुत्रं केम देना सुषुवे सुते गविषणं महात्मानं सं[illegible]संगतिने [illegible]रवा
विहारे तु वने विचरता पुरा वैश्यायाम ददा शौरिः पुत्रं कौशलमग्रजं सुतानोरम्भगजाच शौरेरासां परिग्रहे
मुंडश्च कपिलश्चैव वसुदेवो गजाबली जरानामविपादोभूत् प्रथमः सधनुर्धरः सौभश्च महात्मानौ महामती
बभ्रवतुः देवनागसुतस्यापि नाम्नामासुरुसमस्ततः पंडितं प्रथमं जाऊदेंवश्च वरासुतं मे रोक्षाकीलभवनासुतमम
नाहं हैमेनाग्विनी निर्धनगागासुप्रःश्वाद्दत्तस्यादजायत करूषायामपत्याय कृष्णस्तु सुतान्ददौ सुमद्रेतुमहा
नागं वीर्यवंतं महाबलं जांबवत्याः सुतावेतौ सौचमक्रूतलक्षणौ वारुदेमाश्च सांबश्च वीर्यवंतौ महाबलौ तं
तिपालश्च नंतिश्च नंदनस्य सुतावुभौ समीकपुत्राश्चत्वारो विक्रांता सुमहाबलाः विरंजाश्च धनुश्चैव वश्यामाश्च मं
जयस्तथा अनपत्योऽनवद्यात्मा मधूपश्च धनंजयो जुगुप्समानं भोजत्वं राजर्षित्वं मवाप्तवान् कृष्णमजन्मासुरप

यः कीर्तयति नित्यशः शृणोति मानवो नित्यं सर्वपापैः प्रमुच्यते इति सोमवंशो ४५ श्रीतउ अथापरो वो महादेवः ४
वंद्यरूपस्य प्रजापतिं विहारार्थं स देवो मानुषीष्विव जायते देवकुदेवेन तपसा पुष्करेक्षणः चतुर्बाहुस्तु संजातो
दिव्यरूपश्रियोज्वलः श्रीवत्सलक्षणं देवं दृष्ट्वा दिव्यैस्य लक्षणैः उवाच वसुदेवस्तं रूपं संहर वै विभो भीतोहं
देव कंसस्य ततस्त्वेवं ब्रवीमिते मम पुत्रा हतास्तेन ते ज्येष्ठा भीमविक्रमाः वसुदेववचः श्रुत्वा रूपं संहरताच्यु
तः अनुज्ञाप्य ततश्शौरिं नंदगोपगृहेनयेत दत्तेन नंदगोपस्य रक्षतामिति वाब्रवीत् अतस्तु सर्वकल्याणयाद
वानां तु विष्णुति रूपसुवाच कन्या तौ वसुदेवसुदेव कीव यशस्विनी नंदगोपसुकेन्या यशोदा च महा
व्रता यावि सुत्र नमा मासमपंच तानेसजापते सा गर्भजनका मासमास्ते नसमवर्द्धन्तन् श्रीतउ० पुरुषः कश्यप
स्त्वामी दितिसुत्स्त्रियाम्मृताः अस्यगः कश्यपस्यांशाः पृथिवी वादितिस्तथा अथ कामान्महाबाहु देवक्या
समसजितः यस्तु या कांक्षितो नित्यमजान्ममहात्मनः सो वतीर्णो महीं देवः प्रविष्टो मानुषीं तनुं मोहयन् मस्म०
सर्वभूतानि योगात्मा योगमायया नष्टे धर्मे तथा यज्ञे विष्णुर्वृष्णिकुले प्रभुः कर्तुं धर्मव्यवस्थानमसुराणां ५३
प्रनाशनं रुक्मिणी सत्यभामा च सत्या नाग्नजिती तथा सत्यभामा तथैवाग्र्या ... लक्ष्मणा तथा मित्रविंदा च
कालिंदी देवी जांबवती तथा सुशीमा च तथा माद्री कौशल्या विजया तथा एवमादीनि देवीनां सहस्राणि
षोडश रुक्मिणी जनयामास पुत्रं रणविशारदं चारुदेष्णं महावीर्यं प्रद्युम्नं च महाबलं सुचारुं नंदचारुं च

सुदेष्णं भद्रमेव च परं चारुगुप्तमस्त्रवान् सुचारुकः चारुहासः कनिष्ठश्च ... मतीतथा जज्ञिरे सत्य
भामायां भानुर्भ्रमरमेक्षणः रोहितो दीप्तिमांश्चैव ताम्रबक्षो जलंधमः चत्वारो जज्ञिरे तेषां स्वसारश्च यवीय 103
सी जांबवत्यां सुतौ जज्ञे सांबः समितिशोभनः मित्रवान्मित्रविंदश्च मित्रविंदा वरांगना मित्रबाहुः सुनक्ष 1998
त्रनाग्नजित्याद्विमाः एवमादीनि पुत्राणां सहस्राणि निबोधतः अशीतिच सहस्राणि वासुदेवसुतास्तथा लक्ष
मेकं तथा प्रोक्तं पुत्राणां वृद्धिजोत्तमाः उपासंगस्तु सुतौ वज्रः संक्षिप्त एव च नरेंद्रसेनो दृढश्च गवेषणसुतावुभौ
प्रद्युम्नस्य तु दायादो वैरुक्ष्मो बुद्धिसत्तमः अनिरुद्धो यतश्चाग्ने गानके ततः काश्यपा सुपार्श्वे दनसाज्ञा बालेनेतरविं
नः सप्तप्रहृतयो देवाः पंचावीरा प्रकीर्तिताः तिस्रः कोट्यः प्रवीराणां यादवानां महात्मनां षष्टिशतसहस्रा
णि वीर्यवंतो महाबलाः देवांशाः सर्वएवेह उत्पन्नास्ते महौजसः देवासुरे हता ये च असुरास्ते महाबलाः इहो
त्पन्ना मनुष्येषु बाधंते सर्वमानवान् तेषामुत्सादनार्थाय उत्पन्नो यादवे कुले कुलानां शतमेकं च यादवानां म
हात्मनां सर्वमेतत्कुलं यावद्वर्तते यादवे कुले विष्णुस्तेषां प्रणेता च प्रभुत्वेन व्यवस्थितः निदेशस्थायिनस्तस्य क
थ्यंते सर्वयादवाः ऋषयऊचुः सप्तर्षयः कुबेरश्च यक्षो मणिधरस्तथा सात्यकिर्नारदश्चैव शिवो धन्वंतरिस्तथा
आदिदेवस्तथा विष्णुरेभिः स्वगुप्रदेवतैः किमर्थं संभूताः सत्यसंभूताः संभूतः भविष्यति कतिचास्य प्रादुर्भावा महात्म
ना ब्रह्मक्षेत्रेषु तेषु किमर्थमिह जायते यदर्थमिह संभूतो विष्णुर्वृष्ण्यंधकोत्तमः पुनः पुनः मनुष्येषु तन्नः प्रब्रूहि

इष्टवान् स तु यज्ञैस्तु यस्माद्दिव्यां तनुं विष्णुर्मानुषेष्विह जायते। तत्र पर्याप्ते काले प्रशिथिले प्रभुः। देवासुरविमर्देषु जा-
यते हरिरीश्वरः। हिरण्यकशिपुर्दैत्ये त्रैलोक्यं प्राक् प्रशासति। बलिनाधिष्ठिते चैव पुरा लोकत्रये क्रमात्। सख्य-
मासीत्परमकं देवानामसुरैः सह। युगाख्या दश संपूर्णा आसीदव्याकुलं जगत्। धर्मे धर्मी च वश्यानां जायते मानु-
षेष्विह। भृगोः शापनिमित्तं तु देवासुरकृतेन वा। कथं यज्ञसु। कथं देवासुरकृते व्याहाराशापनयोस्तनः। देवासुरे
यथावत्तन्नः प्रब्रूहि पृच्छतां सूतनन्दन। तेषां दायनिमित्तं ते संग्रामास्तु सुदारुणाः। वाराहाद्या दश द्वौ च षण्डामर्का-
न्तरे स्मृताः। नामतस्तु समासेन शृणु तेषां विवक्षितान्। प्रथमो नारसिंहस्तु द्वितीयश्चापि वामनः। तृतीयस्तु वराहस्तु
चतुर्थोऽमृतमन्थनः। संग्रामः पञ्चमश्चैव संजातस्तारकामयः। षष्ठो ह्याडीवकस्तत्र सप्तमस्त्रैपुरस्तथा। अन्ध-
कारोऽष्टमस्तेषां नवमो वृत्रघातकः। ध्वजश्च दशमस्तेषामेकादशस्तु हालाहलस्ततः। प्रसिद्धो द्वादशस्तेषां घोरः कोला-
हलस्तथा। हिरण्यकशिपुर्दैत्यो नरसिंहेन सूदितः। वामनेन बलिर्बद्धस्त्रैलोक्याक्रमणे पुरा। हिरण्याक्षो हते
द्वन्द्वे प्रतिवादे तु दैवतैः। दंष्ट्रया तु वराहेण समुद्रस्तु द्विधा कृतः। प्रह्लादो निर्जितो युद्धे इन्द्रेणामृतमन्थने। विरोचनस्तु मत्स्य०
प्राह्लादिर्नित्यमिन्द्रवधोद्यतः। इन्द्रेणैव तु विक्रम्य निहतस्तारकामये। अशक्नुवन्देवेषु सोढुं संमरदेवते। निहता ५४
दानवाः सर्वे त्रैलोक्ये त्र्यम्बकेण तु। असुराश्च पिशाचाश्च दानवाश्चान्धके वधे। हता देवमनुष्यैस्ते पितृभिश्चैव सर्वशः।
संसृष्टो दानवैर्वृत्रो घोरे हालाहले हतः। तदा विष्णुसहायेन महेन्द्रेण निबर्हितः। ततो ध्वजे महेन्द्रेण मायाच्छन्नस्तु

योगवित्। ध्वजलक्षणमाविश्य विप्रचित्तिः सहानुजः। दैत्याश्च दानवाश्चैव संयताः कृत्स्नशस्तु सः। जयः कोलाहले स-
र्वैः दैवैः परिवृतो वृषः। सम्यगेते वन्नयोजिताः षण्डामर्कौ तु देवते। एते देवासुरा वृत्ताः संग्रामा द्वादशैव तु। देवा-
सुरक्षयकराः प्रजानां च हिताय वै। हिरण्यकशिपू राजा वर्षाणामर्बुदं बभौ। द्विसप्ततिं तथा ह्यन्यानि नियुतान्यधि-
कानि तु। अशीतिं च सहस्राणि नियुतानि च विंशति। बले राज्याधिकारस्तु यावत्कालं बभूव ह। त्रैलोक्यं पर्यपालयत्।
पर्यायेण तु राजाभूद्बलिर्वर्षार्बुदं पुनः। षष्टिं चैव सहस्राणि नियुतानि च विंशति। बलेः राज्याधिकारस्तु यावत्काले
बभूव ह। तावत्कालं तु प्रह्लादो निवृत्तो ह्यसुरैः सह। इन्द्रास्त्रयस्ते विज्ञेया असुराणां महौजसः। दैत्यसंस्थमिदं सर्वमा-
सीद्दश युगं पुनः। त्रैलोक्यमिदमव्यग्रं महेन्द्रेणानुपाल्यते। असपत्नमिदं सर्वमासीद्दश युगं पुनः। प्रह्लादस्य हृते त-
स्मिंस्त्रैलोक्ये कालपर्यये। पर्यायेण तु संप्राप्ते त्रैलोक्यं पाकशासने। ततोऽसुरान्परित्यज्य शुक्रो देवानगच्छत। यज्ञे
देवानथ गते दितिजाः काव्यमाह्वयन्। किं त्वं नो मिषतो राज्यं त्यक्त्वा यातोऽसि पुनर्गतः। स्थातुं न शक्नुमो ह्यत्र प्रविशामो रसात-
लं। एवमुक्तोऽब्रवीद्देवान्विषण्णान्सान्त्वयन्गिरा। मा भैष्ट धारयिष्यामि तेजसा स्वेन वोऽसुराः। मन्त्राश्चौषधयश्चैव र-
ता मरहन्निता तस्मात्तु सम्राजेन्द्र मुक्तं तस्माहीयं तत्वे गंगानदेम माश्रित्य विभूतिद्वादशीव्रतं कुरुराजेन्द्र निर्वाण
मक्षयसमर्यमसि नंदिकेश्वर उ इत्युक्त्वा स मुनिर्ब्रह्मंस्तत्रैवांतरधीयत राजा यथोक्तं च पुनरकरोत्तुष्पवाहनः
उदमाचरतो व्रत्यमत्वं उव्रत माचरेत यथा कथंचित्कालेन द्वादश द्वादशीं मुने कर्तव्या शक्तितो दद्यात् द्विप्रस्यादि
क्षिणानय नवित्तशाठ्यं कुर्वीत कृता तुष्यति केशवः इति कलुषविदारणीं जनानामपि पठतीह शृणोति वाथ भक्त्या म
तिं ददाति देवलोके वसति स कोटिशतानि संवत्सराणां इति श्रीमत्स्यपुराणे नंदिनारदसंवादे विभूति
द्वादशीव्रतं ॥ ९९ ॥ नंदिकेश्वर उवाच अथातः संप्रवक्ष्यामि व्रतमाहात्म्यमुत्तमं रुद्रेणाभिहितं दिव्यं महापातक
नाशनं नक्तमब्दं चरित्वा तु गवा सार्धं कुटुंबिने हैमं चक्रं त्रिशूलं च दद्यात् द्विजाय वाससी शिवरूपस्ततोस्माभिः शिवलो
के च मोदते एतद्देवव्रतं नाम महापातकनाशनं यस्त्वेकभक्तेन समां शिवं हैमवृषान्वितं धेनुं तिलमयीं दद्यात्स मत्स्य०
पदं याति शांकरं एतद्रुद्रव्रतं नाम पापशोकविनाशनं यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतं एकांतरितनक्ता २२२
शी समांते वृषसंयुतो स वैष्णवं पदं याति लीलाव्रतमिदं स्मृतं आषाढादि चतुर्मासमभ्यंगं वर्जयेन्नरः भोजनोपस्क
रं दद्यात्स याति भवनं हरेः जनप्रीतिकरं नृणां प्रीतिव्रतमिहोच्यते वर्जयित्वा मधौ यस्तु दधिक्षीरघृतैक्षवं दद्याद्वस्त्रा
णि सूक्ष्माणि रसपात्रेण संयुते संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति एतद्गौरीव्रतं नाम भवानीलोकदायकं पुष्यादौ यस्त्र
योदश्यां कृत्वा नक्तमथाश्नुते अशोकं कांचनं दत्वा इक्षुयुक्तं दशांगुलं विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति कल्पं वि
ष्णुपदे स्थित्वा विशोकः स्यात्पुनर्नरः एतत्कामव्रतं नाम सदा शोकविनाशनं आषाढादिव्रताद्यस्तु वर्जयेन्नखकर्तनं वृंताकं
च चतुर्मासं मधुसर्पिर्घटान्विते कार्तिक्यां तत्पुनर्हैमं ब्राह्मणाय निवेदयेत् स रुद्रलोकमाप्नोति शिवव्रतमिदं स्मृतं व
र्जयेद्यस्तु पुष्पाणि हेमंते शिशिरागते पुष्पत्रयं च फाल्गुन्यां कृत्वा शक्त्या तु कांचनं दद्याद्विकालवेलायां प्रीयतां मे शिवः के
शवौ दत्वा परं पदं याति सौम्यव्रतमिदं स्मृतं फाल्गुन्यादि तृतीयायां लवणं यस्तु वर्जयेत् समाप्ते शयनं दद्याद्गृहं चो
पस्करान्वितं संपूज्य विप्रमिथुनं भवानी प्रीयतामिति गौरीलोके वसेत्कल्पं सौभाग्यव्रतमुच्यते संध्यामौनं नरः कृत्वा स
मांते घृतकुंभकं वस्त्रयुग्मं तिलान्घंटां ब्राह्मणाय निवेदयेत् सारस्वतं पदं याति पुनरावृत्तिदुर्लभं एतत्सारस्वतं नाम
रूपविद्याप्रदायकं लक्ष्मीमभ्यर्च्य पंचम्यामुपवासी भवेन्नरः समांते हेमकमलं दद्याद्धेनुसमन्वितं स वैष्णवं पदं याति
लक्ष्मीवान्स्याज्जन्मनि एतत्संपद्व्रतं नाम सदा पापविनाशनं कृत्वोपलेपनं शंभोरग्रतः केशवस्य च यावदब्दं पुनर्दद्या
द्धेनुं जलघटान्वितां जन्मायुतं स राजा स्यात्ततः शिवपुरं व्रजेत् एतदायुर्व्रतं नाम सर्वकामप्रदायकं अश्वत्थं भा
स्करं गंगां प्रणम्यैकत्र वाग्यतः एकभक्तं नरः कुर्यादब्दमेकं विमत्सरः व्रतांते विप्रमिथुनं पूज्य धेनुत्रयान्वितं वृ
क्षं हिरण्मयं दद्यात्सोश्वमेधफलं लभेत् एतत्कीर्तिव्रतं नाम भूतिकीर्तिफलप्रदं घृतेन स्नापनं कृत्वा शंभोर्वा केशवस्य वा

209
1998

स्पव उक्ल तानिःस पुष्पाणि कृत्वा गोमयमंडले निलधेनुसमोपेतं समासे हैमपंकजं शुद्धम धं गुलं दद्याच्छिवलोकम
हीयते सामगाय तस्मैवं का मधुव्रतमुच्यते वम्पाकनकंतु कृत्वा कल्पामल्पाकितः सोऽर्चयित्वा समं दद्याद्देनुं कंकुकवा
सप्ती हेमंमिहंच विप्राय दत्त्वाग्निवपदं व्रजेत् जन्मार्बुदसहस्ररूपःस्मात्तद्धतु मिथ्यापराजितः एतद्धीरव्रतं नाम नारीणांच
मुरवप्रदे यावज्जमंनवेद्यस्तु पंचमांच पयोव्रतः समांतेश्चारुद्ररुहद्याश्चवः पंचपयस्विनीः वासीमिचविप्रोगानिजल
कुनमुतानिच सयातिवैसवलोकं पिन्हगणांतारयेच्छतं कल्पांतेराजराजःस्यात्पित्रव्रतमिदं स्मृतं वर्जयित्वा पुमान्मा
समस्तांतेगोप्रदो भवेत् नद्दहेमपद्मं दद्याश्चाश्वमेधफलं तु वैश्यादिचतुरोमासान्जलं दद्यादयाचितं व्रतांते माणिके
दद्याद्वस्त्रसमन्वितं तिलपात्रंहिरण्यंच ब्रह्मलोकेमहीयते कल्पांतेरूपतिर्नृतं मानंद व्रतमुच्यते पंचामृतेन
स्नपनं कृत्वा संवत्सरं विभो सवत्सरांते पुनर्दद्याद्धेनुं पंचामृतेनहि विप्राय दद्याद्वस्त्रं च सपदं याति शंकरं राजा
नवति कल्पांते धर्मव्रतमिदं स्मृतं वर्जयित्वा पुमान्मासमस्तांते गोप्रदो भवेत् नद्दहेमपद्मं दद्याश्चाश्वमेधफलं लभ
मेत अहिंसाव्रतमित्युक्तं कल्पांते भूपतिर्भवेत् माघमास्युषसि स्नानं कृत्वा दंपत्यमर्चयेत् भोजयित्वा यथाशक्त्या
माल्यवस्त्रविभूषणैः सूर्यलोके वसेत्कल्पं सूर्यव्रतमिदं स्मृतं अनयादयनं यावद्दर्जयेत्पुष्पसर्पिषी
जनेद्दद्यात्कार्त्तिक्यां गोप्रदो भवेत् सवैष्णवं पदं याति विष्णुव्रतमिदं स्मृतं अनयादयनं यावद्वर्जयेत्पुष्पसर्पिषी तदंते
तदंते पुष्पमन्नानि घृतधेन्वा सह हेवत्तु दद्याच्छिवपदं गच्छेद्विप्राय घृतपायसं एतच्छीलव्रतं नाम शीलारोग्यफलप्रदे

मत्स्य०
१११

संध्यादीपप्रदो यस्तु समंतैलविवर्जयेत् समांते वापिकां दद्याच्चक्रशूलेच कांचने वस्त्रयुग्मंच विप्राय तेजस्वीनरसवेदिह
रुद्रलोकमवाप्नोति दीपव्रतमिदं स्मृतं कार्त्तिके कार्त्तिकादौयः श्रावणे गोमूत्रयावकं नक्तंचरेद्हैमकं समस्तांते गोप्रदो
भवेत् गौरीलोके वसेत्कल्पं ततो राजाभवेदिह एतद्दुद्रव्रतं नाम सदा कल्याणकारकं वर्जयित्वा चैत्रमासेच यश्च गंधा
नुलेपनं शुक्लां गांच कृत्वा दत्त्वा विप्राय सितवाससी वारुणं पदमाप्नोति दीप्तिव्रतमिदं स्मृतं वैशाखे पुष्पलवणं वा
र्जयित्वा तु गोप्रदः भूत्वा विष्णुपदे कल्पं स्थित्वा राजाभवेदिह एतत्कांतिव्रतं नाम कीर्त्तिकांतिफलप्रदं ब्रह्मांडं कां
चनं कृत्वा तिलराशिसमन्वितं त्र्यहं तिलप्रदो भूत्वा वह्निं संतर्प्य च द्विजं संपूज्य विप्रदंपती माल्यवस्त्रविभूषणैः शक्ति
तश्चिपलादूर्ध्वं विश्वात्मा प्रीयतामिति पुण्येह्नि विप्राय दद्याद्ब्रह्मव्रतमिदं स्मृतं एतत्कृत्य परं ब्रह्म याति वीणापदं दामकप
श्चात् नयमुरवीदद्यात्स्वर्ण तकनकान्वितां दिनं पयोव्रतं तिष्ठेत्स याति परमं पदं एतद्धेनुव्रतं नाम पुनरावृत्तिदुर्ल
भं त्र्यहं पयोव्रतः स्थित्वा कांचनं कल्पपादपं पलादूर्ध्वं यथाशक्त्या तंडुलैस्सह संयुतं दत्त्वा ब्रह्मपदं याति कल्पव्रत
मिदं स्मृतं मासोपवासी यो दद्याद्धेनुं विप्राय शोभनां सवैष्णवं पदं याति भीमव्रतमिदं स्मृतं दद्याद्विंशपलादूर्ध्वं म
हीं कृत्वा तु कांचनीं दिनं पयोव्रतं तिष्ठेद्रुद्रलोके महीयते धराव्रतमिदं प्रोक्तं सप्तकल्पशतानुगं माघमासेथ चैत्रे
वा गुडधेनुप्रदो भवेत् गुडव्रतस्तृतीयायां गौरीलोके महीयते महाव्रतमिदं नाम परमानंदकारकं पक्षोपवासी या
दद्याद्विप्राय कपिलाद्वयं स ब्रह्मलोकमाप्नोति देवासुरसुपूजितं कल्पांते सर्वराजस्यात् प्रभाव्रतमिदं स्मृतं वत्सरं ए

211
1998

कं भुक्ताशी समनक्तजन्नक्तेन यः। शिवलोके वसेत्कल्पं प्रीतिव्रतमिदं स्मृतं। नक्ताशी चाष्टमी स्याद्वत्सरान्ते च धेनुदः। पौरंदरं पुरं याति सुगतिव्रतमुच्यते। विप्रायेन्धनदो यस्तु वर्षादि चतुरस्ततः। घृतधेनुप्रदोऽप्यन्ते स परं ब्रह्म गच्छति। वैश्वानरव्रतं नाम सर्वपापप्रणाशनं। एकादश्यां च नक्ताशी यश्चक्रं विनिवेदयेत्। समान्ते वैष्णवं हैमं स विष्णोः परमाप्नुयात्। एतत्कृष्णव्रतं नाम कल्पान्ते राज्यभाग्भवेत्। पायसाशी समान्ते तु दद्याद्विप्राय गोयुगं। लक्ष्मीलोके वसेत्कल्पमेतद्देवीव्रतं स्मृतं। सप्तम्यां नक्तभुग्दद्यात्समान्ते गां पयस्विनीं। सूर्यलोकमवाप्नोति भानुव्रतमिदं स्मृतं। चतुर्थ्यां नक्तकृद्दद्यादब्दान्ते हेमवारणं। व्रतं विनायकं नाम शिवलोकफलप्रदं। महाफलानि यस्त्यक्त्वा चातुर्मास्ये द्विजातये। हैमानि कार्त्तिके दद्याद्गोयुगेन समं नरः। एतत्फलव्रतं नाम विष्णुलोकफलप्रदं। यास्त्वाषाढादशी यस्तु समाप्योपोषणेन च। गोवस्त्रकाञ्चनैर्विप्रान्पूजयेच्छक्तितो नरः। परमं पदमाप्नोति विष्णुव्रतमिदं स्मृतं। कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत्। शैवं पदमाप्नोति वृषव्रतमिति स्मृतं। कृच्छ्रान्ते गोप्रदः कुर्याद्भोजनं शक्तितः पदं। विप्राणां शांकरं याति प्राजापत्यमिदं स्मृतं। चतुर्दश्यां तु नक्ताशी समान्ते माधनप्रदः। शैवं पदमवाप्नोति त्र्यम्बकमिदं व्रतं। सप्तरात्रोषितो दद्याद्घृतकुम्भं द्विजातये। घृतव्रतमिदं प्राहुर्ब्रह्मलोकफलप्रदं। आकाशशायी समान्ते दद्याद्धेनुं समान्ते पयस्विनीं। शक्रलोके वसेन्नित्यमिन्द्रव्रतमिदं स्मृतं। अनग्निपक्वमश्नाति तृतीयायां तु यो नरः। गां दद्याच्छिवमभ्येति परमाव्रतमिदं स्मृतं। हैमं पलद्वयाद् रथमश्वयुगान्वितं। ददत्कृतोपवासः स्यात्त्रिवर्जितं। इदं लोकानदं कल्पाग्निर्योगव्रतमिदं स्मृतं।

मत्स्य० २१३

विकल्पेशान्तं वसेत्। कल्पान्ते च राजा स्याद्दश्वव्रतमिदं स्मृतं। तद्धेमरथं दद्यात्करिभ्यां संयुतं नरः। सत्यलोके वसेत्कल्पं सहस्रमथ भूपतिः। भवेदुपोषितो भूत्वा करिव्रतमिदं स्मृतं। उपवासं परित्यज्य समान्ते गोप्रदो भवेत्। यक्षाधिपत्यमाप्नोति वरुणव्रतमुच्यते। निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत्। वारुणं लोकमाप्नोति वरुणव्रतमुच्यते। चान्द्रायणं च यः कुर्याद्धैमं चन्द्रं निवेदयेत्। चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकफलप्रदं। ज्येष्ठे पञ्चतपाः सायं हेमधेनुप्रदो नरः। यात्यष्टमीं तु रूपा रुद्रव्रतमिदं स्मृतं। सकृत्कुरककं कृत्वा तृतीयायां शिवालये। समान्ते धेनुदो याति भवानीव्रतमुच्यते। माघे निश्यार्द्रवासाः स्यात्सप्तम्यां गोप्रदो भवेत्। दिविकल्पमुषित्वेह राजा स्यात्पवनव्रतं। त्रिरात्रोपोषितो दद्यात्फाल्गुन्यां भवनं शुभं। आदित्यलोकमाप्नोति मोक्षमिच्छव्रतादिह। दत्वासितहितीयायामि शौलं वर्णभाजनं। समान्ते गोप्रदो याति विप्राय शिवमन्दिरं। कल्पान्ते राजराजः स्यात्सोमव्रतमिदं स्मृतं। प्रतिपक्षेकभक्ताशी समान्ते कपिलाप्रदः। वैश्वानरपदं याति शिवव्रतमिदं स्मृतं। दशम्यामेकभक्ताशी समान्ते दशधेनुदः। एतद्दिग्व्रतं नाम महापातकनाशनं। यः पठेच्छृणुयाद्वापि व्रतषष्टिमनुत्तमं। मन्वन्तरशतं सोऽपि गन्धर्वाधिपतिर्भवेत्। षष्टिव्रतं नारद पुण्यमेतत्तवोदितं विश्वजनीनमस्मिन्। श्रोतुं तवेच्छा तदुदीरयामि विप्रेषु किं वा कथनीयमस्ति। इति श्रीमत्स्यपुराणे नन्दिनारदसंवादे षष्टिव्रते १०० नन्दीश्वर उवाच। नैर्मल्यं भवशुद्धिश्च विना स्नानं न विद्यते। तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते। अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत्। तीर्थं प्रकल्पयेद्विद्वान्मूलमन्त्रेण मन्त्रवित्। नमो नारायणायेति मूलमन्त्र उदाहृतः। दर्भ

213
1998

चतुर्हस्तसमायुक्तं चतुरस्रं समंततः। प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः।
पाणिस्तु विधिनाऽऽवाहयेत्... विष्णोः पादप्रसूतासि वैष्णवी विष्णुदेवता। पाहि नस्त्वेनसस्तस्मादाजन्ममरणांतिकात्। तिस्रः कोट्योऽर्धकोटी च तीर्था-
नां वायुरब्रवीत्। दिवि भुव्यंतरिक्षे च तानि ते संति जाह्नवी। नंदिनीत्येव ते नाम देवेषु नलिनीति च। दक्षा पृथ्वी च वि-
हगा विश्वकाया शिवामृता। विद्याधरी सुप्रशांता तथा लोकप्रसादिनी। क्षेमा च जाह्नवी चैव शांता शांतिप्रदायिनी।
एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत्। भवेत्संनिहिता तत्र गंगा त्रिपथगामिनी। सप्तवाराभिजप्तेन करसंपु-
टयोजितं। मूर्ध्नि कुर्याज्जलं भूयस्त्रिचतुःपंचसप्तकं। स्नानं कुर्यान्मृदा तद्वदामंत्र्य तु विधानतः। अश्वक्रांते रथक्रांते
विष्णुक्रांते वसुंधरे। मृत्तिके हर मे पापं यन्मया पूर्वसंचितं। उद्धृतासि वराहेण कृष्णेन शतबाहुना। नमस्ते सर्व-
लोकानां प्रभवारणि सुव्रते। एवं स्नात्वा ततः पश्चादाचम्य तु विधानतः। उत्थाय वाससी शुक्ले शुद्धे तु परिधाय वै। तत
स्तु तर्पणं कुर्यात्त्रैलोक्याप्यायनाय वै। देवा यक्षास्तथा नागा गंधर्वाप्सरसोऽसुराः। क्रूराः सर्पाः सुपर्णाश्च तरवो जंभकाः मत्स्य०
खगाः। वाय्वाधारा जलाधारास्तथैवाकाशगामिनः। निराधाराश्च ये जीवा ये च धर्मरतास्तथा। तेषामाप्यायनायैतद्दीयते ११४
सलिलं मया। कृतोपवीती देवेभ्यो निवीती च भवेत्ततः। मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रानृषींस्तथा। सनकश्च सनंदश्च
तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा। सर्वे ते तृप्तिमायांतु मद्दत्तेनांबुना सदा। मरीचिमत्र्यंगिर
सौ पुलस्त्यं पुलहं क्रतुं। प्रचेतसं वसिष्ठं च भृगुं नारदमेव च। देवब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैः। अपसव्यं ततः कृ

त्वा सव्यं जान्वाच्य भूतले। अग्निष्वात्तास्तथा सौम्या हविष्मंतस्तथोष्मपाः। सुकालिनो बर्हिषदस्तथान्ये चाज्यपाः पुनः। सं
तर्पयेत्पितॄन्भक्त्या सतिलोदकचंदनैः। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूत
क्षयाय च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः। दर्भपाणिस्तु विधिना पि
तॄन्संतर्पयेत्सुधीः। पित्रादीन्नामगोत्रेण तथा मातामहानपि। संतर्प्य विधिना भक्त्या इमं मंत्रमुदीरयेत्। येऽबांधवा
बांधवा ये येऽन्यजन्मनि बांधवाः। ते तृप्तिमखिला यांतु ये चास्मत्तोयकांक्षिणः। ततश्चाचम्य विधिवदालिखेत्पद्ममग्र
तः। अक्षताभिः सपुष्पाभिः सजलारुणचंदनं। अर्घ्यं दद्यात्प्रयत्नेन सूर्यनामानि कीर्तयेत्। नमस्ते विष्णुरूपा
य नमो विष्णुमुखाय वै। सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे। नमस्ते शिव सर्वेश नमस्ते सर्ववत्सल। जगत्स्वामिन्
नमस्तेऽस्तु दिव्यचंदनभूषित। नमस्ते सर्वलोकेश जगत्सर्वं विबोधसे। सुकृतं दुष्कृतं चैव सर्वं पश्यसि सर्वग। सत्यदेव न
मस्तेऽस्तु प्रसीद मम भास्कर। दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते। एवं सूर्यं नमस्कृत्य त्रिः कृत्वा च प्रदक्षिणां। द्वि
जं गां कांचनं स्पृष्ट्वा ततो विष्णुगृहं व्रजेत्। इति श्रीमत्स्यपुराणे दिनाररक्षे स्नानविधिः १०२ नंदिकेश्वर उवाच
अतःपरं प्रवक्ष्यामि प्रयागस्योपवर्णनं। मार्कंडेयेन कथितं यत्पुरा पांडुसूनवे। भारते तु यदा वृत्ते प्राप्तराज्ये युधिष्ठि
रे। एतस्मिन्नंतरे राजा कुंतीपुत्रो युधिष्ठिरः। भ्रातृशोकेन संतप्तश्चिंतयानः पुनः पुनः। आसीद्दुर्योधनो राजा एकादश
चमूपतिः। अस्मान्संताप्य बहुधाः सर्वे ते निधनं गताः। वासुदेवं समाश्रित्य पंच शिष्टा वयं त्विह। हत्वा भीष्मं च द्रोणं च

215
1998

कर्णं चैव महाबलं ॥ दुर्योधनं च राजानं पुत्रभ्रातृसमन्वितं ॥ राजानो निहताः सर्वे चान्ये शूरमानिनः ॥ किं नो राज्येन गो
विंद किं भोगैर्जीवितेन वा ॥ धिक्कष्टमिति संचिंत्य राज्यवैक्लव्यमागतः ॥ निर्विण्णो हि निरुत्साहः किंचित्तिष्ठन्नधोमुखः ॥
लब्धसंज्ञो यदा राजा चिंतयन्स पुनः पुनः ॥ कामे गतिर्नियोगो वा नियमं तीर्थमेव च ॥ येनाहं शीघ्रमामुंच महापा
तककिल्बिषात् ॥ यत्र स्नात्वा नरो याति निर्वृतिं लोकमुत्तमं ॥ कथं पृच्छामि वै कृष्णं येनेदं कारितो ह्यहं ॥ धृतराष्ट्रं
कथं पृच्छे यस्य पुत्रशतं हतं ॥ एवं वैक्लव्यमापन्नो धर्मराजो युधिष्ठिरः ॥ रुदंति पांडवाः सर्वे भ्रातृशोकपरिप्लुताः ॥
ये च तत्र महात्मानः समेताः पांडवाः स्थिताः ॥ कौंती च द्रौपदी चैव ये च तत्र समागताः ॥ भूमौ निपतिताः सर्वे रुदंते
स्तु समंततः ॥ वाराणस्यां च मार्कंडेयेन ज्ञातो युधिष्ठिरः ॥ अचिरेणैव कालेन मार्कंडेयो महातपाः ॥ संप्राप्तो ह
स्तिनःपुरं राजद्वारे स तिष्ठति ॥ द्वारपालोपि तं दृष्ट्वा राज्ञः कथितवान्द्रुतं ॥ त्वां द्रष्टुकामो मार्कंडेयो द्वारि तिष्ठति वै मु
निः ॥ त्वरितो धर्मपुत्रस्तु द्वारमागादतः परं ॥ युधिष्ठिर उवाच ॥ स्वागतं ते महाभाग स्वागतं ते महामुने ॥ अद्य मे सफ
लं जन्म अद्य मे तारितं कुलं ॥ अद्य मे पितरस्तुष्टास्त्वयि दृष्टे महामुने ॥ अद्याहं पूतदेहोस्मि यत्त्वया सह दर्शनं ॥ नं मत्स्य०
दिरुवाच ॥ सिंहासनमुपस्थाप्य पादशौचार्चनादिभिः ॥ युधिष्ठिरो महात्मा वै पूजयामास तं मुनिं ॥ ततः संतुष्टो मार्कं ॥२२५॥
डेयः पूजितस्तदा नृपं ॥ आख्याहि त्वरितं राजन्किमर्थं रुदितं त्वया ॥ किमर्थं विक्लवीभूतः कातरः कथयाति किमप्रियं यु
धिष्ठिर उवाच ॥ अस्माकं चैव यद्वृत्तं राज्यस्यार्थे महामुने ॥ सर्वमेतद्विदित्वा तु चिंतां वशमुपागतः ॥ श्रीमार्कंडेय उवाच ॥

शृणु राजन्महाबाहो क्षत्रधर्मव्यवस्थितं ॥ नैव दृष्टं रणे पापं युध्यमानस्य धीमतः ॥ किं पुनः राजधर्मेण क्षत्रियस्य वि 217/1948
शेषतः ॥ न देवं हृदये कृत्वा तस्मात्पापं न चिंतयेत् ॥ ततो युधिष्ठिरो राजा प्रणम्य शिरसा मुनिं ॥ प्रणम्य विनयोपेतः
सर्वपातकनाशनः ॥ युधिष्ठिर उवाच ॥ पृच्छामि त्वां महाप्राज्ञ नित्यं कल्पदर्शनं ॥ कथयस्व समासेन येन मुच्येत किल्बि
षात् ॥ श्रीमार्कंडेय उवाच ॥ शृणु राजन्महाबाहो सर्वपातकनाशनः ॥ प्रयागगमनं श्रेष्ठं नराणां पुण्यकर्मणां ॥ इति
श्रीमत्स्यपुराणे नंदिनारदसंवादे प्रयागमाहात्म्ये ॥ १०२ ॥ युधिष्ठिर उवाच ॥ श्रोतुमिच्छामि पुराकल्पे यथा स्थितं ॥ ब्रह्म
णा देवमुख्येन यथावत्कथयाद्यपि ॥ श्रीमार्कंडेय उवाच ॥ कथयिष्यामि ते वत्स यच्छ्रेष्ठं तत्र यत्फलं ॥ पुरा हि सर्ववि
प्राणां कथ्यमानं मया श्रुतं ॥ आप्रयागप्रतिष्ठानात्पुरा वासुकेर्ह्रदात् ॥ कंबलाश्वतरौ नागौ नागश्च बहुमूलकः ॥ एत
त्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतं ॥ तत्र स्नात्वा दिवं यांति ये मृतास्ते पुनर्भवे ॥ ततो ब्रह्मादयो देवा रक्षां कुर्वंति संगताः ॥
अन्ये च बहवस्तीर्थाः सर्वपापहराः शुभाः ॥ न शक्याः कथितुं राजन्बहुवर्षशतैरपि ॥ संक्षेपेण प्रवक्ष्यामि प्रयागस्य तु
कीर्तनं ॥ षष्टिर्धनुःसहस्राणि यानि रक्षंति जाह्नवीं ॥ यमुनां रक्षति सदा सविता सप्तवाहनः ॥ प्रयागं तु विशेषेण सदा रक्ष
ति वासवः ॥ मंडलं रक्षति हरिर्दैवतैः सह संगतः ॥ तं वटं रक्षति सदा शूलपाणिर्महेश्वरः ॥ स्थानं रक्षंति वै देवाः सर्वपाप
हरं शुभं ॥ अधर्मेणावृतो लोको नैव गच्छति तत्पदं ॥ स्वल्पमल्पतरं पापं यदा तस्य नराधिप ॥ प्रयागं स्मरमाणस्य स
र्वमायाति संक्षयं ॥ दर्शनात्तस्य तीर्थस्य नामसंकीर्तनादपि ॥ मृत्तिकालंभनाद्वापि नरः पापाद्विमुच्यते ॥ पंचकुंडानि

राजेंद्र तपोमयेन जाह्नवी प्रयागस्य प्रवेशो तु पापं नश्यति तत्क्षणात् योजनानां सहस्रेषु गंगायाः स्मरणान्नरः गंगा
यमुनयो मध्ये स्नातो मुच्यंते किल्बिषात् मनसाभिचिंतयन् कामान् वाप्नोति सपुष्कलान् ततो गत्वा प्रयागं तु सर्वदेवा
भिरक्षितं ब्रह्मचारी वसेन्मासं पितॄन् देवांश्च तर्पयेत् ईप्सितान् लभते कामान् यत्र यत्राभिजायते तपनस्य सुता देवी
त्रिषु लोकेषु विश्रुता समागता महाभागा यमुना यत्र निम्नगा तत्र संनिहितो नित्यं साक्षाद्देवो महेश्वरः दुःप्राप्यं
मानुषैः पुण्यं प्रयागं तु युधिष्ठिर देवदानवगंधर्वा ऋषयः सिद्धचारणाः तदुपस्पृश्य राजेंद्र स्वर्गलोकमुपासते इ
ति श्रीम० नंदिना० प्रयागमहात्म्ये १०३ श्रीमार्कंडेय उ० शृणु राजन् प्रयागस्य माहात्म्यं पुनरेव तु यच्छ्रुत्वा सर्वपा
पेभ्यो मुच्यते नात्र संशयः आर्त्तानां हि दरिद्राणां निश्चितव्यवसायिनां स्थानमुक्तं प्रयागं तु नाख्येयं तु कदाचन दी
प्तकांचनवर्णाभैः विमानैः सूर्यसन्निभैः व्याधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः गंगायमुनयोर्मध्ये यस्तु
प्राणान् परित्यजेत् दीप्तकांचनवर्णाभैः विमानैः सूर्यसन्निभैः गंधर्वाप्सरसां मध्ये स्वर्गे क्रीडति मानवः ईप्सितां
लभते कामान् वदंति मुनिपुंगवाः सर्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः वरांगनासमाकीर्णैर्मोदते शुभलक्षणैः प्रया०
गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते यावन्न स्मरते जन्म तावत्स्वर्गे महीयते ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दि ११६
वश्च्युतः हिरण्यरत्नसंपूर्णे समृद्धे जायते कुले तदेव स्मरते तीर्थं स्मरणात्तत्र गच्छति देशस्थो यदि वारण्ये विदेशे
वा यदि वा गृहे प्रयागं स्मरमाणोपि यस्तु प्राणान् परित्यजेत् ब्रह्मलोकमवाप्नोति वदंति ऋषिपुंगवाः सर्वकामफ

ला वृक्षा मही यत्र हिरण्मया ऋषयो मुनयः सिद्धास्तत्र लोकं स गच्छति स्त्रीसहस्राकुले रम्ये मंदाकिन्यास्तटे शु
भे मोदते ऋषिभिः सार्धं सुकृतेनेह कर्मणा सिद्धचारणगंधर्वैः पूज्यते दिवि दैवतैः ततः स्वर्गमवाप्नोति चिं
तयानः पुनः पुनः गुणवान्वित्तसंपन्नो भवतीह न संशयः कर्मणा मनसा वाचा धर्मसत्यप्रतिष्ठिताः गंगायमु
नयोर्मध्ये यस्तु ग्रामं प्रतीच्छति सुवर्णमणिमुक्तां वा यदि वान्यत्प्रतिग्रहे स्वकार्ये परकार्ये वा देवतानर्चनेपि
वा फलं तस्य तत्तीर्थं यावत्तत्फलमश्नुयात् एवं तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु वा निमित्तेषु च सर्वेषु अ
प्रमत्तो भवेद्द्विजः कपिलां पाटलावर्णां यस्तु धेनुं प्रयच्छति स्वर्णशृंगीं रूप्यखुरां कांस्यदोहां पयस्विनीं प्रयागे
श्रोत्रियं संतं ग्राहयित्वा यथाविधि शुक्लांबरधरं शांतं धर्मज्ञं वेदपारगं सा तु गावः प्रदातव्या गंगायमुनसंग
मे वासांसि च महार्हाणि रत्नानि विविधानि च यावद्रोमाणि तस्या गोः संति गात्रेषु सत्तम तावद्वर्षसहस्राणि स्व
र्गलोके महीयते यत्रासौ लभते जन्म सा गौस्तत्राभिजायते नच पश्यति तं घोरं नरकं तेन कर्मणा उत्तरान्स कु
रून्प्राप्य मोदते कालमक्षयं अपत्यानां सहस्रेभ्यो दद्यादेकां पयस्विनीं पुत्रान् दारांस्तथा भृत्यान् गौरेका प्रतितार
येत् तस्मात्सर्वेषु दानेषु गोदानं तु विशिष्यते दुर्गमे विषमे घोरे महापातकसंभवे गौरक्षां कुरुते तस्माद्देया हि
जोत्तमे इति श्री म० नंदिना० प्रयागमहात्म्ये १०४ युधिष्ठिर उ० यथा यथा प्रयागस्य माहात्म्यं कथितं त्वया तथा त
था प्रमुच्येहं सर्वपापैर्न संशयः भगवन् केन विधिना कर्त्तव्यो धर्मनिश्चयः प्रयागे यो विधिः प्रोक्तः तं मे ब्रूहि महामुने

219
1998

श्रीमार्कंडेय उवाच॥ कथयिष्यामि ते राजंस्तीर्थयात्राविधिक्रमं आर्षेण विधिनानेन यथा दृष्टं यथाश्रुतं प्रयागती
र्थयात्रार्थी यः प्रयाति नरः क्वचित् बलीवर्दं समारूढः शृणु तस्यापि यत्फलं नरके वसते घोरे गवां क्रोधो हि दारु
णः सलिलं च न गृह्णंति पितरस्तस्य देहिनः यस्तु पुत्रांस्तथा बालान् स्नापयेत्पाययेत्तथा यथात्मनस्तथा सर्वा
न्दानं विप्रेषु दापयेत् ऐश्वर्यलोभमोहाद्वा गच्छेद्यानेन यो नरः निःफलं तस्य तत्सर्वं तस्माद्यानं विसर्जयेत् गंगाय
मुनयोर्मध्ये यस्तु कन्यां प्रयच्छति आर्षेण तु विवाहेन यथाविभवसंभवं न च पश्यति तं घोरं नरकं तेन कर्म
णा उत्तरान्स कुरून्गत्वा मोदते कालमक्षयं पुत्रान्दारांश्च लभते धार्मिकान् रूपसंयुतान् तत्र दानं प्रकर्त
व्यं यथाविभवसंभवं तेन तीर्थफलं चैव वर्धते नात्र संशयः स्वर्गे तिष्ठति राजेंद्र यावदाहूतसंप्लवं वटमूलं
समासाद्य यस्तु प्राणान्विमुंचति सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति तत्र ते द्वादशादित्यास्तपंते रुद्रसंस्थि
ताः निर्दहंति जगत्सर्वं वटमूलं न दह्यति नष्टचंद्रार्ककिरणे यदा चैकार्णवे जगत् स्वपते तत्र वै विष्णुर्यजमानः प्रया०
पुनः पुनः देवदानवगंधर्वा ऋषयः सिद्धचारणाः लोकपालाश्च साध्याश्च पितरो लोकसंमताः सनत्कुमारश्च ३७
मुखाश्चैव परमर्षयः अंगिराप्रमुखाश्चैव तथा ब्रह्मर्षयोऽपरे सर्पा नागाः सुपर्णाश्च सिद्धाश्च कर्पराश्च ये
सागराः सरितः शैलाः नागा विद्याधराश्च ये हरिश्च भगवानास्ते प्रजापतिपुरस्कृतः गंगायमुनयोर्मध्ये पृथिव्या ज
घनं स्मृतं प्रयागं राजशार्दूल त्रिषु लोकेषु भारत श्रवणात्तस्य तीर्थस्य नामसंकीर्तनादपि मृत्तिकालंभनाद्वा

पितरः पापाद्विमुच्यंते तत्राभिषेकं यः कुर्यात्संगमे संशितव्रतः तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः न
देववचनात्तात न लोकवचनात्तथा मतिरुत्क्रमणीया ते प्रयागगमनं प्रति दशतीर्थसहस्राणि षष्टिकोट्यस्तथा
तेषां सान्निध्यमत्रैव सततं कुरुनंदन या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः सा गतिस्त्यजतः प्राणान् गंगाय
मुनसंगमे न ते जीवंति लोकेऽस्मिंस्तत्र तत्र युधिष्ठिर ये प्रयागं न संप्राप्तास्त्रिषु लोकेषु वंचिताः एवं दृष्ट्वा तु
तत्तीर्थं प्रयागं परमं पदं मुच्यते सर्वपापेभ्यः शशांक इव राहुणा कंबलाश्वतरौ नागौ विपुले यमुनातटे त
त्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते तत्र गत्वा च संस्थानं महादेवस्य धीमतः नरस्तारयते सर्वान् दश पूर्वान्
दशापरान् कृत्वाभिषेकं तु नरः सोऽश्वमेधफलं लभेत् स्वर्गलोकमवाप्नोति यावदाहूतसंप्लवं पूर्वपार्श्वे तु गं
गायास्त्रिषु लोकेषु भारत कूपश्चैव तु सामुद्रः प्रतिष्ठानेन विश्रुतं ब्रह्मचारी जितक्रोधस्त्रिरात्रं यदि तिष्ठति सर्वपाप
विशुद्धात्मा सोऽश्वमेधफलं लभेत् उत्तरेण प्रतिष्ठानाद्भागीरथ्यास्तु सर्वतः हंसप्रपतनं नाम तीर्थं त्रैलोक्यविश्रुतं अश्व
मेधफलं तस्मिन्स्नानमात्रेण भारत यावच्चंद्रश्च सूर्यश्च तावत्स्वर्गे महीयते उर्वशीरमणे पुण्ये विपुले हंसपांडुरे परि
त्यजेद्यः प्राणान् शृणु तस्यापि षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च सेव्यते पितृभिः सार्द्धं स्वर्गलोके नराधिप
उर्वशीं च सदा पश्येत्स्वर्गलोके नरोत्तम पूज्यते सततं तत्र ऋषिगंधर्वकिन्नरैः ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दि
वस्तुतः उर्वशीसदृशीनां कन्यानां लभते शतं मध्ये नारीसहस्राणां बह्वीनां च पतिर्भवेत् दशग्रामसहस्राणां भोक्ता

221
1998

भवतिक्षमिप॥ कांचीनूपुरशब्देनसुप्तोप्रतिबुध्यते॥ मुक्तांतुविपुलांश्रीगांगान्नतीर्थंसमंप्रतुनः॥ अथसंध्यावटेरम्ये
ब्रह्मचारीजितेंद्रियः॥ उपासितशुचिःसंध्यांब्रह्मलोकमवाप्नुयात॥ कोटितीर्थंसमाश्रित्ययस्तुप्राणान्परित्यजेत
कोटिवर्षसहस्राणांस्वर्गलोकेमहीयते॥ ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मादिवश्चुतः॥ सुवर्णमणिमुक्ताढ्येकुलेजा
यतेरूपवान॥ ततोभोगवतीगत्वावासुकेरुत्तरेणतु॥ दशाश्वमेधकंतीर्थंनामतत्रापरंभवेत॥ कृताभिषेकस्तुन
रःसोश्वमेधफलंलभेत॥ धनाढ्योरूपवान्दक्षोदाताभवतिधार्मिकः॥ चतुर्वेदेषुयत्पुण्यंसत्यवादिषुचा
हिंसायांतुयोधर्मोगमनादेवतत्फलं॥ कुरुक्षेत्रसमागंगायत्रतत्रावगाहिता॥ कुरुक्षेत्राद्दशगुणाकालिंद्यायत्र
संगता॥ यत्रगंगामहाभागाबहुतीर्थातपोधना॥ सिद्धक्षेत्रंहितज्ज्ञेयंनात्रकार्याविचारणा॥ क्षितौतारयते
मर्त्यान्नागांस्तारयतेप्यधः॥ दिवितारयतेदेवांस्तेनत्रिपथगास्मृता॥ यावदस्थीनिगंगायांतिष्ठंतिहिशरीरिणां
तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥ तीर्थानांपरमंतीर्थंनदीनांतुमहानदी॥ मोक्षदासर्वभूतानांमहापातकि
नामपि॥ सर्वत्रसुलभागंगात्रिषुस्थानेषुदुर्लभा॥ गंगाद्वारेप्रयागेचगंगासागरसंगमे॥ तत्रस्नात्वादिवंयांतियेमृ म०प्र०
तास्तेपुनर्भवे॥ सर्वेषामेवभूतानांपापोपहतचेतसां॥ गतिमन्विष्यमाणानांनास्तिगंगासमागतिः॥ पवित्राणांपवि १९८
त्रंचमंगलानांचमंगलं॥ महेश्वरशिरोभ्रष्टासर्वपापहराशुभा॥ इतिश्रीम०नंदिनारदसं०प्रयागमहात्म्ये १०५ श्री
मार्कंडेयउ० शृणुराजन्प्रयागस्यमहात्म्यंपुनरेवतु॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥ मानसेनामतीर्थे

तुगंगायामुत्तरेमते॥ त्रिरात्रोपोषितोभूत्वासर्वकामानवाप्नुयात॥ एतत्फलंपरिप्राप्यतत्तीर्थंस्मरतेपुनः॥ अकामो
वासकामोवागंगायांयोविपद्यते॥ मृतस्तुलभतेस्वर्गंनरकंतुनपश्यति॥ ततःस्वर्गात्परिभ्रष्टाःक्षीणकर्मादिवश्चु
तः॥ सुवर्णमणिमुक्ताढ्यकुलेसदाभिजायते॥ षष्टितीर्थसहस्राणिस्वर्गलोकेमहीयते॥ ततःस्वर्गात्परिभ्रष्टोजंबुद्वी
पपतिर्भवेत॥ भुक्त्वाविपुलांभोगांस्तत्तीर्थंलभतेनरः॥ तत्रप्रवेशायःकुर्यात्संगमेलोकविश्रुते॥ राहुग्रहेतथासोमे 223
विमुक्तःसर्वकिल्बिषैः॥ सोमलोकमवाप्नोतिसोमेनसहमोदते॥ षष्टिवर्षसहस्राणिस्वर्गलोकेमहीयते॥ परिभ्रष्ट 1448
स्तुराजेंद्रसमृद्धेजायतेकुले॥ अधःशिरास्तुयोज्वालामूर्ध्वपादःपिबेन्नरः॥ शतंवर्षसहस्राणिस्वर्गलोकेमहीय
ते॥ परिभ्रष्टस्तुराजेंद्रअग्निहोत्रीभवेन्नरः॥ भुक्त्वातुविपुलांभोगांस्तत्तीर्थंलभतेनरः॥ वासुकेश्चोत्तरेकूलेप्रयागस्यतुदक्षि
णे॥ ऋणप्रमोचनंतीर्थंप्रयागेपरमंस्मृतं॥ एकरात्रोपोषितःस्नात्वाऋणैःसर्वैःप्रमुच्यते॥ सूर्यलोकमवाप्नोतिअनृणी
चसदाभवेत॥ इतिश्रीम०नंदिनारदसं०प्रयागमहात्म्ये १०६ युधिष्ठिरउ० एतत्कृतंप्रयागस्ययन्मयापरिकीर्तितं॥ वि
शुद्धंमेहृदयंप्रयागस्यतुकीर्तनात॥ अनाशकफलंब्रूहिभगवंस्तत्रकीदृशं॥ येनलोकमवाप्नोतिविशुद्धःसर्वकि
ल्बिषैः॥ श्रीमार्कंडेयउ० शृणुराजन्प्रवक्ष्यामिअनाशकफलंविभो॥ यत्प्राप्नोतिपुरुषोधीमानश्रद्दधानोजितेंद्रियः॥
अहीनांगोप्यरोगश्चपंचेंद्रियसमन्वितः॥ अश्वमेधफलंतस्यगच्छतस्तुपदेपदे॥ कुलानितारयेद्राजन्दशपूर्वा
दशापरान॥ मुच्यतेसर्वपापेभ्योगच्छेत्तुपरमंपदं॥ युधिष्ठिरउ० महाभाग्यंहिधर्मस्यत्वंवदसिमेप्रभो॥ अल्पेन

वप्रयत्नेन बहून् धर्मान् यथाश्रुतान्॥ अश्वमेधैस्तु बहुभिः प्राप्यते सुकृतैरिह॥ इमं मे संशयं ब्रूहि परं कौतूहलं हि
मे॥ श्रीमार्कंडेय उ०॥ शृणु राजन्महावीर यदुक्तं पद्मयोनिना॥ ऋषीणां सन्निधौ ह सर्वकल्मषनाशनं म स्तातुतं॥ पंचयोज
नविस्तीर्णं प्रयागस्तु मंडलं॥ प्रवेशात्तस्य तद्भूमौ मोऽश्वमेधफलं लभेत्॥ व्यतीतांस्तु पुरुषान्सप्त भविष्यांश्च
चतुर्दश॥ नरस्तारयते सर्वान्यस्तु प्राणान्परित्यजेत्॥ एवं ज्ञात्वा तु राजेंद्र सदा सेवापरो भवेत्॥ अश्रद्धानास्तु रूपापा
पोपचेतसः॥ न प्राप्नुवंति तत्स्थानं प्रयागे देवरक्षितं॥ युधिष्ठिर उ०॥ स्नेहाद्वा द्रव्यलोभाद्वा ये तु कामवशंगताः॥ क
थं तीर्थफलं तेषां कथं पुण्यफलं लभेत्॥ विक्रयः सर्वभांडानां कार्याकार्यमजानतः॥ प्रयागे का गतिस्तस्य
तन्मे ब्रूहि महामते॥ श्रीमार्कंडेय उ०॥ शृणु राजन्महागुह्यं सर्वपापप्रणाशनं॥ मासमेकं तु यः स्नायात्प्रयागे निय
तेंद्रियः॥ मुच्यते सर्वपापेभ्यो यथादिष्टं स्वयंभुवा॥ अविशुद्धप्रयागेन्नुत्वा हिंसकः श्रद्धयान्वितः॥ मुच्यते सर्वपापेभ्यो प
गच्छेत्परमं पदं॥ विश्रमध्यानतां यांतु प्रयागेऽप्युमस्तके॥ त्रिकालमेव स्नायीत आहारं भैक्षमाचरेत्॥ त्रिभिर्मा
सैः समुच्येत प्रयागेन तु संशयः॥ अज्ञानेन तु यस्येह तीर्थयात्रादिकं भवेत्॥ सर्वकामसमृद्धस्तु स्वर्गलोके म प्रयाग०
हीयते॥ स्थानं च लभते नित्यं धनधान्यसमाकुलं॥ एवं ज्ञानेन संप्रणसि हाभवनिनां गवान्॥ तारिताः पितरस्तेन न २२८
रकात्प्रपितामहः॥ धर्मानुसारितत्त्वज्ञ दृष्टस्ते पुनःपुनः॥ तत्त्वियार्थसमाख्यातेतुआमेन स्नानातनं॥ युधिष्ठि
र उ०॥ अद्य मे सफलं जन्म दिष्ट्या ते तारितं कुले॥ प्रीतोस्म्यनुग्रहीतोस्मि दर्शनादेव ते मुने॥ तद्दर्शनात्तु धर्मात्मन्कोहं

चायाकिल्बिषान्॥ रतानीवेद वा ज्ञानेन गवानगतकिल्बिषं॥ श्रीमार्कंडेय उ०॥ दिष्ट्या ते सफलं जन्म दिष्ट्या ते तारितं
कुलं॥ कीर्तनाद्वर्द्धते पुण्यं स्नानात्पापं प्रणश्यति॥ युधिष्ठिर उ०॥ यमुनायां तु किं पुण्यं किं फलं तु महामुने॥ एतन्मे
सर्वमाख्याहि यथादृष्टं यथाश्रुतं॥ श्रीमार्कंडेय उ०॥ तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता॥ समागता महाभा 225 / 1998
गा यमुना तत्र निम्नगा॥ येनैव निःसृता गंगा तेनैव यमुना गता॥ योजनानां सहस्रेषु कीर्तनात्पापनाशनी॥ त
त्र स्नात्वा च पीत्वा च यमुनायां युधिष्ठिर॥ कीर्तनाल्लभते पुण्यं दृष्ट्वा भद्राणि पश्यति॥ अवगाह्य च पीत्वा च पुनात्यासप्त
जन्मानि॥ प्राणांस्त्यजति यस्तत्र स याति परमां गतिं॥ अग्नितीर्थमिति ख्यातं यमुनादक्षिणे तटे॥ उत्तरे तु प्रवक्ष्यामि आदित्य
स्य महात्मनः॥ तीर्थं निरंजनं नाम यत्र देवाः सवासवाः॥ उपासते सदा संध्यां त्रिकालं तु युधिष्ठिर॥ देवाः सेवंति तत्तीर्थं ये
चान्ये विबुधा जनाः॥ श्रद्दधानपरो भूत्वा कुरु तीर्थाभिषेचनं॥ अन्ये च बहवस्तीर्थाः सर्वपापहराः शुभाः॥ तेषु स्नात्वा दिवं यां
ति ये मृतास्तेऽपुनर्भवे॥ गंगा च यमुना चैव तुल्ये तुल्यफले स्मृते॥ केवलं ज्येष्ठभावेन गंगा सर्वत्र पूज्यते॥ एवं कौंतेय स
र्वतीर्थाभिषेचने॥ यावत्तु वस्तुं मे पापं तत्क्षणादेव नश्यति॥ यश्चिमं कल्यमुत्थाय पठते च शृणोति च॥ मुच्यते सर्वपापे
भ्यः स्वर्गलोकं स गच्छति॥ इति श्रीम० नंदि नारद० प्रयागमहात्म्ये ७॥ युधिष्ठिर उ०॥ श्रुतं मे ब्रह्मणा प्रोक्तं पुराणे ब्रह्मसंम
ते॥ तीर्थानां तु सहस्राणि त्रिशतानि नियुतानि च॥ सर्वपुण्यपवित्राणि गतिश्च परमा स्मृताः॥ पृथिव्यां नैमिषं पुण्यं अं
तरिक्षे तु पुष्करं॥ त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते॥ सर्वाणि तानि संत्यज्य कथमेकं प्रशंससि॥ एतन्मे संशा

यं ब्रह्महि यथा दृष्टं यथा श्रुतं ॥ श्री मार्कंडेय उ० ॥ अत्र देयं न कर्त्तव्यं स्वल्पमपि यत्नतः नरः स्यादत्र हस्तानस्य पापो
पहतचेतसः ॥ अत्र ह्यानो न स्मृतिरुद्भवेत् नियमात्कुमंगलः ॥ गते पातकिनः सर्वे तेन दृष्टा विनश्यति ॥ शृणु प्रयाग महा
त्म्यं यथा दृष्टं यथा श्रुतं ॥ प्रत्यक्षं च परोक्षं च यथा नष्टं न विद्यति ॥ यथैवान्यद्ब्रह्म दृष्टं च यथा दृष्टं तथा श्रुतं ॥ शास्त्रं प्र
माणं कृत्वा तु युज्यते योगमात्मनः ॥ क्लिश्यते चापरस्तत्र नैव योगमवाप्नुयात् ॥ जन्मांतरसहस्रेभ्यो योगो लभ्येत मा
नवः ॥ यथा योगसहस्रेण योगो लभ्येत मानवैः ॥ यस्तु सर्वाणि रत्नानि ब्राह्मणेभ्यः प्रयच्छति ॥ तेन दानेन दत्तेन योगो
लभ्येत मानवैः ॥ प्रयागे तु मृतस्येदं सर्वं भवति नान्यथा ॥ प्रधानहेतुं वक्ष्यामि श्रद्दधानो मिस्तारं तं यथा सर्वेषु भू
तेषु सर्वत्रैव च दृश्यते ॥ ब्रह्मणो व्याप्ति यथा किंचिद् आत्मगामिनि चोच्यते ॥ एवं सर्वेषु लोकेषु ब्रह्म सर्वेषु दृश्यते ॥ तथा
सर्वेषु लोकेषु प्रयागं दृश्यते बुधैः ॥ पूज्यते तीर्थराजस्तु सत्यमेव युधिष्ठिर ॥ ब्रह्मापि स्मरते नित्यं प्रयागं तीर्थमुत्त
मं ॥ तीर्थराजमनुप्राप्य न चान्यत्किंचिदर्हति ॥ को हि देवत्वमासाद्य मनुष्यत्वं चिकीर्षति ॥ अनेनैवोपमानेन त्वया
मसि युधिष्ठिर ॥ यथा पुण्यतमं नास्ति तथैव कथितं त्वया ॥ युधिष्ठिर उ० ॥ श्रुतं चेदं त्वया प्रोक्तं विस्मितोहं पुनः पु ॥ मत्स्य० ॥
नः ॥ कथं योगेन तस्यास्ति स्वर्गवासं तु कर्मणा ॥ दानावै लभते भोगान् गां च य कर्मणः फलं ॥ नानि कर्माणि पृच्छा ॥ १२० ॥
मि पुनर्येः प्राप्यते मही ॥ श्री मार्कंडेय उ० ॥ शृणु राजन्महाबाहो यथोक्तकरणी मही ॥ गामाश्रित्य आश्रमेत्राम्ब
चनं पालितं स्त्रियः मातरं पितरं चैव ये निंदंति नराधमाः ॥ न तेषां मूर्द्धगमनं एवमाह प्रजापतिः ॥ एवं योगस्य संप्राप्ति

स्थानं परमदुर्लभं ॥ गच्छंति नरकं घोरं ये नराः पापकर्मिणः ॥ हस्त्यश्वगामनड्वाहं मणिमुक्तादिकांचनं ॥ परोक्षं हर
ते यस्तु दानं नैव प्रयच्छति ॥ न ते गच्छंति वै स्वर्गं दातारो यत्र भोगिनः ॥ अनेककर्मणा युक्तः पच्यते नरकेधमः ॥ एवं यो
गं च धर्मं च दातारं च युधिष्ठिर ॥ यथा सत्यं समं संवा नास्ति नास्तीति यत्फलं ॥ निष्कृतं तु प्रवक्ष्यामि यथा दृष्टं यथा श्रु
मान् ॥ इति श्री म० मनु मत्स्य० प्रयागमहात्म्यं ॥ १०८ ॥ श्री मार्कंडेय उ० ॥ शृणु राजन्प्रयागस्य माहात्म्यं पुनरेव तु ॥ नैमि
षं पुष्करं चैव गोतीर्थं सिंधुसागरं ॥ गयाश्च चैत्ररथं चैव गंगासागरमेव च ॥ एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः ॥
दश तीर्थसहस्राणि त्रिंशत्कोट्यस्तथापराः ॥ प्रयागे संस्थितानित्यं एवमाहुर्मनीषिणः ॥ त्रीणि चाप्यग्निकुंडानि ये
षां मध्येन जाह्नवी ॥ प्रयागादभिनिष्क्रांता सर्वदेवनमस्कृताः ॥ तपनस्य सुता देवी त्रिषु लोकेषु विश्रुताः ॥ यमुना
गंगया सार्द्धं संगता लोकपावनी ॥ गंगायमुनयोर्मध्ये पृथिव्या जघनं स्मृतं ॥ प्रयागं राजशार्दूल कलां नार्हंति षोडशीं
तिस्रः कोट्यर्द्धकोटी च तीर्थानां वायुरब्रवीत् ॥ दिवि भुव्यंतरिक्षे च तत्सर्वं जाह्नवी स्मृता ॥ प्रयागं समधिष्ठानं कंब
लाश्वतरौ भुजं ॥ भोगवत्यथ या चैषा वेदिरेषा प्रजापतेः ॥ तत्र वेदाश्च यज्ञाश्च कीर्तिमंतो युधिष्ठिर ॥ प्रजापतिमुपासंते
ऋषयश्च तपोधनाः ॥ यजंते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥ ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत ॥ प्रभावं सर्वतीर्थे
भ्यः प्रभवत्यधिकं विभो ॥ श्रुत्वैतच्चापि तत्रैव गंगातीरसमन्वितं ॥ इदमन्यं विजानीयात्सानुद्वनामात्मजस्य च सुरुद्र
स्य जपेत्कर्णौ त्रिमस्यानुमनस्य च ॥ इदं धन्यमिदं स्वर्ग्यमिदं सेव्यमिदं सुखं ॥ इदं पुण्यमिदं कीर्त्यं पावनं धर्ममुत्तमं म

227
1998

स्थानं परमदुर्लभं गच्छन्ति नरकं घोरं ये नराः पापकर्मिणः हस्त्यश्वगामनड्वाहं मणिमुक्तादिकांचनं परोक्षं हर
न्ते ये स्तु दानं नैव प्रयच्छन्ति न ते गच्छन्ति वै स्वर्गं दातारो यत्र योगिनः अनेककर्मणा युक्तः पच्यते नरकेधमः एवं यो
गेन धर्मं च दातारं च युधिष्ठिर यज्ञमस्य समस्तं वा नास्ति नास्तीति यत्फलं निरुक्तं तु प्रवक्ष्यामि यथाह स्वयमंभु
मान् इति श्री म० मनु मत्स्य० प्रयागमाहात्म्यं १०८ श्री मार्कंडेय उवाच शृणु राजन् प्रयागस्य माहात्म्यं पुनरेव तु नैमि
षं पुष्करं चैव गोतीर्थं सिंधुसागरं गयाश्च चैत्रकं चैव गंगासागरमेव च एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः
दश तीर्थसहस्राणि त्रिंशत्कोट्यस्तथा पराः प्रयागे संस्थितास्तानि नित्यं एवमाहुर्मनीषिणः त्रीणि चाप्यग्निकुंडानि ये
षां मध्येन जाह्नवी प्रयागाद्विनिष्क्रांता सर्वदेवनमस्कृता तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता यमुना
गंगया सार्द्धं संगता लोकपावनी गंगायमुनयोर्मध्ये पृथिव्या जघनं स्मृतं प्रयागं राजशार्दूल कलां नार्हति षोडशीं
तिस्रः कोट्यर्द्धकोटी च तीर्थानां वायुरब्रवीत् दिवि भुव्यन्तरिक्षे च तत्सर्वं जाह्नवी स्मृताः प्रयागं समधिष्ठानं कंबल
ाश्वतरौ च भोगवत्यथ या चैषा वेदिरेषा प्रजापतेः तत्र वेदाश्च यज्ञाश्च मूर्तिमंतो युधिष्ठिर प्रजापतिमुपासंते
ऋषयश्च तपोधनाः यजंते क्रतुभिर्देवाश्चक्रचराश्च नृपाः ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत प्रभावात्सर्वतीर्थे
भ्यः प्रभवत्यधिकं विभो सिद्धक्षेत्रं च विज्ञेयं गंगातीरसमन्वितं इदमन्यं विजानीयात्साधुनात्मजस्य च सुहृदः
स्य तु पैतृकं यच्छिष्यस्यानुगतस्य च इदं धन्यमिदं स्वर्ग्यमिदं मेध्यमिदं सुखं इदं पुण्यमिदं कीर्त्यं पावनं धर्ममुत्तमं म

227
1998

हृषीकांपि दं गतो सर्वपापप्रणाशनं अधीत्य चहिजोप्येनन्निर्मलं स्वर्गमाप्नुयात् यस्त्विमं शृणुयान्नित्यं तीर्थं पुण्यं सदा
शुचिः जातिस्मरत्वं लभते नाकपृष्ठे च मोदते प्राप्यंते तानि तीर्थानि सद्भिः शिष्टानुदर्शिभिः स्नाहि तीर्थेषु कौरव्य मा च
वक्रगतिर्भव त्वया च सम्यकृष्टेन कथितानि मया विभो तारितास्पितरः सर्वे तथैव च पितामहाः प्रयागस्य तु सर्वे
ते कलानार्हंति षोडशीं एवं ज्ञानं च योगं च तीर्थं चैव युधिष्ठिर बहुक्लेशेन युज्येत न ते यांति परांगतिं त्रिकालं च
जपन्नित्यं ते स्वर्गलोकं गमिष्यति इति श्री म॰ प्रयागमहात्म्ये १०७ युधिष्ठिर उ॰ कथं सर्वमिदं प्रोक्तं प्रयागस्य म
हामुने एतन्नः सर्वमाख्याहि यथाहि मम तारयेत् श्रुणु राजन् महाबाहो प्रोक्तं सर्वमिदं जगत् ब्रह्मा विष्णुस्तथा
सो मो देवेनाप्रभुरव्ययः ब्रह्मा सृजति भूतानि स्थावरं जंगमं च यत् तान्येतानि परे लोके विष्णुः संवर्द्धते प्रजाः क
ल्पांते तत्समग्रं हि रुद्रः संहरते जगत् तदा हरति वाप्येतन्न कदाचिद्विनश्यति ईश्वरः सर्वभूतानां यः पश्यति स प
श्यति अन्ने तान्संवनि ष्टति ते यांति परमां गतिं युधिष्ठिर उ॰ आख्याहि यथा तत्त्वं यथैषा तिष्ठते श्रुतिः केन वा कारणे
नैव तिष्ठते लोकसत्तमाः श्री मार्कंडेय उ॰ प्रयागे वसते येन ब्रह्मा विष्णु महेश्वराः कारणं तत्र वक्ष्यामि शृणु तत् म॰प्र॰
युधिष्ठिर पंचयोजन विस्तीर्णं प्रयागस्य तु मंडलं तिष्ठंति रक्षणार्थाय पापकर्मनिवारणात् यस्मिन्जुहुकं पापं १११
नरकं च न पश्यति एवं ब्रह्मा च विष्णुश्च प्रयागे नित्यमीश्वरः उत्तरेण प्रतिष्ठानं छन्ना ब्रह्मा तिष्ठति महेश्वरो वटोभू
त्वा तिष्ठति यावदाभूत म सप्त द्वीपाः समुद्राश्च पर्वताश्च महीतले धियमाणाश्च तिष्ठंति यावदाभूत संप्लवं येता

नो बहवश्चैव तिष्ठति च युधिष्ठिर पृथिवी तत्समुद्रस्थिते न हि देवतात्रये प्रजापतेरिदं क्षेत्रं प्रयागमिति विश्रुत
एतत्पुण्यं पवित्रं च प्रयागे च युधिष्ठिर स्वराज्यं कुरु राजेंद्र भ्रातृभिः सहितोनघ इति श्री म॰ प्रयाग महात्म्ये ११० नं
दिरु॰ भ्रातृभिः सहितः सर्वैः सप्तमानः समाधया ब्राह्मणैः सोन मस्कृत्य गुरुदेवाग्रतर्पयेत् वासुदेवोपि तत्रैव कृष्णे
नैव स्यात् स्मृता पांडवैः सहितः सर्वैः सप्तमानस्समाधया कृष्णोपि सहितैः सर्वैः स्मविंश युधिष्ठिरं एतस्मिन्नंतरे 229/1998
चैव मार्कंडेयो महामुनि ततः स्वस्तीति चोक्त्वा तु क्षणादाश्रममस्यगात् युधिष्ठिरोपि धर्मात्मा भ्रातृभिः सहितो व
सन् महादानेन तोष्टत्वा धर्मस्तु युधिष्ठिरः यश्चेदं कल्पमुत्थाय महात्म्यं पठते नरः मुच्यते सर्वपापेभ्यो रुद्रलो
कं स गच्छति वासुदेव उवाच मम वाक्यं च कर्तव्यं महाराज युधिष्ठिरः नित्यं जपस्व जुहुष्व प्रयागे विगतज्वरः प्र
याग स्मर चैतित्वं तस्मात्त्वं वै युधिष्ठिर स्वयं प्राप्स्यसि राजेंद्र स्वर्गलोकं न संशयः प्रयागमनुगच्छेद्वा वसते वापि योन
रः सर्वपापविशुद्धात्मा रुद्रलोकं महीयते प्रतिग्रहादुपावृत्तः संतुष्टो येन केनचित् अहंकारविमुक्तात्मा स ती
र्थफलमश्नुते ऋषिभिः क्रतवः प्रोक्ता देवैश्चापि यथाक्रमं नहि ता शक्या दरिद्रेण यज्ञाः कर्तुं महीपते बहूपक
रणा यज्ञा नानासंभारविस्तराः प्राप्यंते पार्थिवैरेते समृद्धैर्वा नरैः क्वचित् अकोपनश्च राजेंद्र सत्यवादी दृढव्र
तः आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते यद्दरिद्रैरपि विधिभिः शक्यः प्राप्तुं युधिष्ठिर तुल्यो यज्ञफलैः पुण्यै
स्तंनिबोध वदामि ते ऋषीणां परमं गुह्यमिदं भरतसत्तमः तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते दशतीर्थ

महस्राणि त्रिंशत्कोट्यस्तथा परः॥ माघमासे गमिष्यन्ति गंगायां भरतर्षभ॥ स्वस्थो भव महाराज भुंक्ष्व राज्यम
कंटकं॥ पुनर्द्रक्ष्यसि मां देव यत्र मानैर्विशोधनः॥ नैमिषे कंस्वरजा॥ इत्युक्त्वा स महाभागो मार्कंडेयो महातपाः
युधिष्ठिरं स्वरूपेण तत्रैवांतरधीयत॥ ततस्तत्र महाप्राज्ञ गत्वा प्रयागं नृप। यथोक्तेन विधानेन पुनाति
स्वेति मागतः। तथा त्वमेव देवर्षे प्रयागाभिमुखो भव॥ अभिषेकं तु कृत्वा च कृतकृत्यो भविष्यति॥ सूत उ॰ ए
वमुक्त्वा ययौ धीमांस्तत्रैवांतरधीयत॥ नारदोपि जगामाशु प्रयागाभिमुखस्तदा॥ तत्र स्नात्वा च जप्त्वा च विधिं द
ष्ट्वा न कर्मणा॥ दानं दत्वा द्विजातिभ्यो गतस्स्वर्गवनं ततः॥ इति श्री म॰ प्रयागमाहात्म्यं॥ ऋषय ऊ॰ कति द्वीपाः समु
द्राश्च पर्वताश्च कति विभो॥ कियंति चैव वर्षाणि तेषु नद्यश्च काः स्मृताः॥ महाभूतप्रमाणं च लोकालोकस्त
थैव च॥ पर्यायः परिमाणं च गतिश्चंद्रार्कयोस्तथा॥ एतत्प्रब्रूहि नः सर्वं विस्तरेण यथार्थतः॥ त्वदुक्तादेव सकलं
श्रोतुमिच्छामहे वयं॥ द्वीपभेदसहस्राणि सप्तस्वंतर्गतानि च॥ न शक्यते क्रमेणेह वक्तुं वै सकलं जगत॥ सप्तैव
तु प्रवक्ष्यामि चंद्रादित्यग्रहैः सह॥ तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते॥ अचिन्त्याः खलु ये भावा न तांस्तर्के मस्म॰
ण साधयेत्॥ प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणं॥ सप्त वर्षं प्रवक्ष्यामि जंबुद्वीपं यथाविधि॥ विस्तारं मंडलं २२२
चैव योजनैस्तन्निबोधत॥ योजनानां सहस्राणि शतं द्वीपस्य विस्तरं॥ नानाजनपदाकीर्णं पुरैश्च विविधैः शुभैः॥ सि
द्धचारणसंकीर्णं पर्वतैरुपशोभितं॥ सर्वधातुपिनद्धैश्च शिलाजालसमुद्भवैः॥ पर्वतप्रभवाभिश्च नदीभिस्तु समंत

तः॥ प्रागायता महापर्वाः षडिमे वर्षपर्वताः॥ अवगाढा ह्युभयतः समुद्रौ पूर्वपश्चिमौ॥ हिमप्रायश्च हिमवान्हे
मकूटश्च हेमवान्॥ पर्वतः सुसुखश्चापि निषधः पर्वतो महान्॥ चातुर्वर्ण्यः स सौवर्णो मेरुश्चोल्बमयः स्मृतः॥ च
तुर्विंशसहस्राणि विस्तीर्णः स चतुर्दिशं॥ वृत्ताकृतिः प्रमाणाच्च चतुरस्रः समाहितः॥ नानावर्णः स पार्श्वे प्रजापति 231
गुणान्वितः॥ नाभिबंधनसंभूतो ब्रह्मणोऽव्यक्तजन्मनः॥ पूर्वतः श्वेतवर्णस्तु ब्राह्मण्यं तेन तस्य वै॥ पीतश्च दक्षि 1998
णेनासौ तेन वैश्यत्वमिष्यते॥ भृंगपत्रनिभश्चैव पश्चिमेन समन्वितः॥ तेनास्य शूद्रता नाम्नो मेरोर्नामार्थकर्मतः॥ पा
र्श्वमुत्तरतस्तस्य रक्तवर्णस्वभावतः॥ तेनास्य क्षत्रभावस्स्यादिति वर्णाः प्रकीर्तिताः॥ नीलश्च वैडूर्यमयः श्वेतः पी
तो हिरण्मयः॥ मयूरबर्हवर्णस्तु शातकौंभः सुशृंगवान्॥ एते पर्वतराजानः सिद्धचारणसेविताः॥ तेषामंतरविष्कं
भो नव साहस्रमुच्यते॥ मध्ये इलावृतं नाम महामेरोः समंततः॥ चतुर्विंशसहस्राणि विस्तीर्णो योजनैः समः॥ म
ध्ये तस्य महामेरुर्विधूम इव पावकः॥ वेद्यर्धं दक्षिणं मेरोरुत्तरार्धं तथोत्तरे॥ वर्षाणि यानि सप्तात्र तेषां सप्त प
र्वताः॥ द्वे द्वे सहस्रे विस्तीर्णो योजनैर्दक्षिणोत्तरे॥ जंबूद्वीपस्य विस्तारस्तेषामायाम उच्यते॥ नीलश्च निषधश्चैव
तस्मादानामायेपरे॥ श्वेतश्च हेमकूटश्च हिमवान्कूटवांश्च यः॥ जंबूद्वीपप्रमाणेन नंदनः परिकीर्तितः
तस्माद्दशानामायेन हेमकूटोपि हीयते॥ हिमवान्विंशमेनायेन तस्मादेव प्रहीयते॥ अष्टाशीतिसहस्राणि हेम
कूटो महागिरिः॥ अशीतिर्हिमवाञ्छैल आयतः पूर्वपश्चिमे॥ द्वीपस्य मंडलीभावात् ह्रासवृद्धिः प्रकीर्त्यते वर्षा

णां पर्वतानां च यथाभेदेन चोत्तरं तेषां मध्ये जनपदास्तानि वर्षाणि सप्त वै प्रपातविषमैस्तु पर्वतैरावृतानि
तु सम्मतानि नदीभेदैरगम्यानि परस्परं वसंति तेषु सत्वानि नानाजातानि सर्वशः इमं हैमवतं वर्षं भारतं ना
म विश्रुतं हेमकूटं परं तस्मान्नाम्ना किंपुरुषं स्मृतं हेमकूटाच्च निषधे हरिवर्षं तदुच्यते हरिवर्षात्परं चापि मेरोश्च
त इलावृतं इलावृतात्परं नीलं रम्यकं नाम विश्रुतं रम्यकादपरं श्वेतं विश्रुतं तद्धिरण्मयकं हिरण्मयात्परं चैव शृं
माकं कुरु स्मृतं धनुःसंस्थे तु विज्ञेये द्वे वर्षे दक्षिणोत्तरं दीर्घाणि तस्य चत्वारि मध्यमं तदिलावृतं पूर्वतो निषधस्येदं
वेद्यर्धं निषधस्यार्धं परं इलावृतं पश्चाद्वेद्यर्धं तु तदुत्तरं तु स्मृतं तु महाभोगो माल्यवान्नाम पर्वतः द्वात्रिंश
त्सहस्राणि प्रतीच्यामनुगानुगाः माल्यवत्सेय हस्रकस्थानीलनिषधावपि द्वात्रिंशत्सैव मण्डूकः पर्वतो गंधमा
दनः विपुलस्य सुपार्श्वस्य सर्वरत्नविराजिताः परिमंडलस्तन्मध्ये मेरुः कनकपर्वतः चातुर्वर्ण्यसमो वर्णैस्तु
स्यमनुच्छिकः नानावर्णसमस्तेषु पूर्वे श्वेतं तदुच्यते पीतं तु दक्षिणतस्तस्य भृंगपत्रनिभं परं उत्तरे तस्य रक्तं वै इति मत्स्य०
वर्णसमन्वितः भुवनैरावृतः सर्वजातरूपपरिष्कृतः तत्र देवगणाश्चैव गंधर्वासुरराक्षसाः शैलराजे प्रमोदंते ९३
सर्वतोऽप्सरसांगणाः स तु मेरुः परिवृतो भुवनैर्भूतभावनैः यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः भद्राश्वो भर
तश्चैव केतुमालश्च पश्चिमे उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः विष्कंभपर्वतास्तस्य मंदरो गंधमादनः विपुलश्च
सुपार्श्वश्च सर्वरत्नविभूषिताः अरुणोदं मानसं चैव सितोदं भद्रसंज्ञितं तेषामुपरि चत्वारि सरांसि वनानि च तथानद

कदंबस्तु मंदरे गंधमादने जंबूवृक्षश्चाश्वत्थो विपुलोपवसत्परं गंधमादनपार्श्वे तु पश्चिमे वरगंडिकः द्वा
त्रिंशत्सहस्राणि योजनैः सर्वतः समः तत्र ते पुण्यकर्माणः केतुमालाः परिश्रुताः तत्र कालानराः सर्वे महासत्वा म
हाबलाः स्त्रियश्चोत्पलवर्णाभाः सुंदर्यः प्रियदर्शनाः तत्र दिव्यो महादारुः पनसः पत्रभासुरः तस्य पीत्वा फलरसं
मंजीवंति समायुतं माल्यवंतस्य पार्श्वे तु पूर्वे पूर्वा तु गंडिकः द्वात्रिंशत्सहस्राणि तत्रापि प्रथितमुच्यते भद्रश्च तत्र 238 / 1998
विज्ञेयो नित्यं मुदितः मानसः भद्रमालवनं तत्र कालाम्रश्च महाद्रुमः तत्र ते पुरुषाः श्वेता महोत्साहा महाबलाः स्त्रियः
कुमुदवर्णाभाः सुंदर्यः प्रियदर्शनाः चंद्रप्रभाश्च वर्णेनाः पूर्णचंद्रनिभाननाः चंद्रशीतलगात्राश्च स्त्रियो ह्युत्प
लगंधिकाः दशवर्षसहस्राणि तासामायुरनामयं कालाम्रस्य रसं पीत्वा सर्वे ते स्थिरयौवनाः सूत उ इत्युक्त
वा ऋषीन्सूत्वा वर्षाणि च विशेषतः पूर्वमनुप्रहरणार्धयाः किं वर्णयामि वः एतच्छ्रुत्वा वचस्तेषु ऋषयः संशि
सितव्रताः जातकौतूहलाः सर्वे प्रहृष्टास्तु मुदान्विताः ऋषयो रोमहर्षणमाख्यातो भारतो तेनान्यथा मुने उत्तराणां च व
र्षाणां पर्वतानां च सर्वशः आचक्ष्व नो यथा तथ्यं ये च पर्वतवासिनः एवमुक्तस्तु ऋषिभिस्तैः सम्यगाख्यानवा
न्मुनिः सूत उ शृणुध्वं तानि वर्षाणि पूर्वोक्तानि च वै मया दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु वर्षं रमणकं
नाम तत्र जायंते वै प्रजाः रतिप्रधाना विमलाः जायंते तत्र मानवाः शुक्लाभिजनसंपन्नाः सर्वे ते प्रियदर्शनाः तत्रा
पि सुमहान्वृक्षो न्यग्रोधो रोहिणो महान् तस्यापि ते फलरसं पिबंतो वर्तयंति वै दशवर्षसहस्राणि दश वर्ष

गतानि च जीवंति ते महाभागोपदा हृष्टा नरोत्तमाः । उत्तरस्य शृंगवतस्य पार्श्वे शृंगस्य हस्तिनो । वर्षं हिरण्मयेना
मनत्र हिरण्मयी नदी महाबला महाभाग्या नित्यं मुदितमानसाः । शुक्लाभिजनसंपन्नाः सर्वे ते प्रियदर्शनाः
एकादश सहस्राणि वर्षाणां ते नरोत्तमाः । आयुःप्रमाणं जीवंति शतानि दश पंच च । तस्मिन् वर्षे महावृक्षो
लकुचः पत्रसंश्रयः । तस्य पीत्वा फलरसं तत्र जीवंति मानवाः । शृंगसाह्वस्य शृंगाणि त्रीणि चैव महांति वै ए
कं मणिमयं तत्र एवं तु कनकान्वितं । सर्वरत्नमयं चैकं भुवनैरुपशोभितं । उत्तरे चास्य शृंगस्य समुद्रांतेव द
क्षिणे । कुरवस्तत्र तद्वर्षं पुण्यं सिद्धनिषेवितं । तत्र वृक्षा मधुफला दिव्याः सजलापगाः । वस्त्राणि च प्र
सूयंते फलात्स्वाभरणानि च । सर्वकामप्रदातारः केचिद्वृक्षा मनोरमाः । अपरे क्षीरिणो नाम वृक्षास्तत्र मनो
रमाः । ये क्षरंति सदा क्षीरं षड्रसं चामृतोपमं । सर्वा मणिमयी भूमिः सूक्ष्मा कांचनवालुका । सर्वत्र सुखसंस्प
र्शा निःशब्दाः पावनाः सुखाः । देवलोकच्युतास्तत्र जायंते मानवाः । शुक्लाभिजनसंपन्ना जायंते स्थिर
यौवनाः । मिथुनानि प्रजायंते स्त्रियश्चाप्सरसोपमाः । तेषां ते क्षीरिणां क्षीरं पिबंत्यमृतोपमं । समं च जाय मत्स्य०
ते मिथुनं समं चैव विवर्द्धते । समं तेजो रूपं वा समं चैव म्रियंति वै । चक्रवाक[illegible]चकुर्वं ज्ञानाम १२४
माविशो कामवृत्तिस्तं मुदितमानवाः । दश वर्षसहस्राणि दश वर्षशतानि च । जीवंति ते महाभागा वाताश्चीप्र
वर्त्तते सूतउ । एवमेव निसर्गो वै वर्षाणां भारते युगे । दृष्टः परतरः सम्यक् किमन्यत् कथयामि वः । आख्यास्ये

वमस्मयः सूतं पुराणधीमता । उत्तरं भरतवर्षस्य पप्रच्छुः सूतनंदनं । इति श्रीमत्स्ये भुवनकोशवर्णनं ११२ ऋषय
ऊचुः । यदिदं भारतं वर्षं तस्मिन् स्वायंभुवादयः । चतुर्दशैव मनवः प्रजासर्गे ससर्जिरे । एतद्वेदितुमिच्छामः 235 / 1998
सकाशात्तव सूतजः । उत्तरं भरतवर्णं तु ऋषिः प्रब्रवीत्तदा वरः । एतच्छ्रुत्वा ऋषीणां तु प्रोवाच लोमहर्षणिः । पौराणि
कस्तदा सूतो ऋषीणां भाविनात्मनां । बुद्ध्या विचार्य बहुधा विमृश्य च पुनः पुनः । तदेव कथयामास उत्तरं भरतवर्ण
तदा । तथाहं वर्णयिष्यामि वर्षेऽस्मिन् भारते प्रजाः । भरणात्तु प्रजानां वै मनुर्भरत उच्यते । निरुक्तवचनैश्चैव
वर्षं तद्भारतं स्मृतं । यतः स्वर्गश्च मोक्षश्च मध्यमश्चांतरः स्मृतः । न खल्वन्यत्र मर्त्यानां भूमौ कर्मविधिः स्मृतः । भारतस्या
स्य वर्षस्य नव भेदान्निबोधत । इंद्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गंधर्वस्त्वथ वा
रुणः । तत्रायं नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरः । आयतस्तु कुमारीतो
गंगायाः प्रवहावधिः । तिर्यगूर्ध्वं तु विस्तीर्णः सहस्राणि दशैव तु । द्वीपो ह्युपनिविष्टोऽयं म्लेच्छैरंतेषु सर्वशः । यवना
श्च किराताश्च तस्यांते पूर्वपश्चिमे । ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः । इज्यायुधवणिज्याभिः वर्तयंतो व्य
वस्थिताः । तेषां संव्यवहारोऽयं वर्तते तु परस्परं । धर्मार्थकामसंयुक्तो वर्णानां तु स्वकर्मसु । संकल्पपंचमानां तु आ
श्रमाणां यथाविधि । इह स्वर्गापवर्गार्थं प्रवृत्तिर्यत्र मानुषैः । यस्त्वयं मानवो द्वीपस्तिर्यग्यामः प्रकीर्तितः । य एनं जयते
कृत्स्नं स सम्राडिति कीर्तितः । अयं लोकस्तु वै सम्राडंतरिक्षजितां स्मृतः । स्वराडसौ स्मृतो लोकः पुनः वक्ष्यामि विस्तरा

त मप्रवास्मिन्महापर्वाविख्याताः कुलपर्वताः ॥ महेंद्रो मलयः सह्यः शुक्तिमानृक्षवानपि ॥ विंध्यश्च पारिपात्रश्च
सप्तैते कुलपर्वताः ॥ तेषां सहस्रशश्चान्ये पार्वतास्तु समीपतः ॥ अभिज्ञाता नतस्थास्ते विपुलाश्चित्रसानवः ॥ अन्ये
तेभ्यः परिज्ञाता ह्रस्वा ह्रस्वोपजीविनः ॥ तैर्विमिश्रा जनपदा आर्या म्लेच्छाश्च सर्वशः ॥ पिबंति बहुला नद्यो गंगा गाः
सिंधुः सरस्वती शतद्रूश्चंद्रभागा च यमुना सरयूस्तथा ॥ इरावती वितस्ता च विपाशा देविका कुहूः ॥ गोमती धुतपा
पा बाहुदा च दृषद्वती ॥ कौशिकी च तृतीया च निश्चीरा गंडकी तथा ॥ चक्षुर्लोहित इत्येते हिमवत्पादनिःसृताः ॥
ताः ॥ वेदस्मृति वेदवती वृत्रघ्नी सिंधुरेव च ॥ पर्णाशा नर्मदा चैव कावेरी महती तथा ॥ पारा च धन्वती रूपा विदु
षा वेणुमत्यपि ॥ शिप्रा अवंती कुंती च पारियात्राश्रिताः स्मृताः ॥ शोणो महानदश्चैव नर्मदा सुरसा क्रिया मंदाकिनी
दशार्णा च चित्रकूटा तथैव च ॥ तमसा पिप्पला श्रोणी चित्रोत्पला मपि ॥ विमला चंचला चैव धूतवाहिनी ॥
शुक्तिमती शुनी लज्जा मुकुटा ह्लादिकामपि ॥ ऋक्षपादप्रसूतास्ताः नद्यो मलजलाः शुभाः ॥ तापी पयोष्णी निर्विं
ध्या मद्रा च निषधा नदी ॥ वेणा वैतरणी चैव विश्वमाला कुमुद्वती ॥ तोया चैव महागौरी दुर्गा सोतःशिला तथा ॥ मत्स्य.
विंध्यपादप्रसूतास्ताः सर्वाः शीतजलाः शुभाः ॥ गोदावरी भीमरथी कृष्णा वेणा च वंजुला ॥ तुंगभद्रा सुप्रयोगा ९५
बाह्या कावेरी चैव दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः ॥ कृतमाला ताम्रपर्णी पुष्पजात्युत्पलावती म
लयोद्भूता नद्यस्ताः सर्वाः शीतजलाः शुभाः ॥ त्रिसामा ऋषिकुल्या च इक्षुला त्रिदिवाचला ॥ ताम्रपर्णी तथा स्थूलीशर

राबा विमला स्वयाः महेंद्रतनयाः स्मृताः ॥ ऋषिका सुकुमारी च मंदगा मंदगामिनी ॥ कृपा पलाशि
नी चैव शुक्तिमंतात्मजाः स्मृताः ॥ सर्वाः पुण्यजलाः पुण्याः सर्वगाश्च समुद्रगाः ॥ विश्वस्य मातरः सर्वाः सर्वपापहराः शुभाः
तासामन्याः सहस्रशः नद्यश्चोपनद्यः स्मृताः ॥ तास्विमे कुरुपांचालाः शाल्वाश्चैव सजांगलाः ॥ शूरसेना भद्रकारा बोधाः स
हपटच्चराः ॥ मत्स्याः किराताः कुल्याश्च कुंतयः काशिकोशलाः ॥ आवंताश्च कलिंगाश्च मूकाश्चैवांधकैः सह ॥ मध्यदेशा
जनपदाः प्रायशः परिकीर्तिताः ॥ सह्यस्यानंतरे चैव तत्र गोदावरी नदी ॥ पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ॥ अपरांताश्च शूद्राश्च पह्लवाश्चात्तखेटिकाः ॥ गांधारा यवनाश्चैव सिंधु
सौवीरमद्रकाः ॥ शतद्रवः पुलिंदाश्च पारदा हारमूर्तिकाः ॥ रामठाः कंटकाराश्च कैकेया दशनामिकाः ॥ क्षत्रियोपनि
वेश्याश्च वैश्यशूद्रकुलानि च ॥ अत्रेयाश्च भरद्वाजाः प्रस्थलाश्च दशेरकाः ॥ लंपाकास्तालगाणाश्च सैनिकाः सह जांगलैः ॥
एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत ॥ अंगा वंगा मद्गुरका अंतर्गिरि बहिर्गिरिः ॥ प्लवंगा मातंगा यम
कामल्लवर्णकाः ॥ सुह्योत्तराः प्रविजया भार्गवा गेयमालवाः ॥ प्राग्ज्योतिषाश्च पौंड्राश्च विदेहास्ताम्रलिप्तकाः ॥ शा
ल्वा मागधगोनर्दाः प्राच्या जनपदाः स्मृताः ॥ तेषां परे जनपदा दक्षिणापथवासिनः ॥ पांड्याश्च केरलाश्चैव चोल्याः
कुल्यास्तथैव च ॥ सेतुका मूषिकाश्चैव कुपथा वाजिवासिकाः ॥ नवराष्ट्रा माहिषिकाः कलिंगाश्चैव सर्वशः ॥ कारू
षा माहिषिकाश्च आटव्याः शबराः स्मृताः ॥ पुलिंदा विंध्यपुलिका वैदर्भा दंडकैः सह ॥ कुलीयाश्च सरीलाश्च रूपसाश्च

2307
1998

पर्मैः सह॥ सच्चानरूनिकायैश्च सर्वाकारस्वयम्प्रभा॥ कामिकाचैव रुथ्येचान्येयचैवान्तरनर्मदाः॥ आरूकरूाम
माहेयाः सह मारस्वैतेष्वप्सा॥ कालिकाश्चैव मौराष्ट्रा आनर्दश्च अर्बुदैः सह॥ इत्येते अपरान्तास्तु शृणुते विंध्यवासि
नः॥ मालवाश्च करूषा मत्कलाश्चोत्कलैः सह॥ आद्या माषा दशार्णाश्च भोजाः किष्किंधकैः सह॥ अरुणाःश्रौडिकं
राश्च वीतिहोत्रा अवेनयः॥ एते जनपदाख्याता विंध्यपृष्ठनिवासिनः॥ अतो देशान्प्रवक्ष्यामि पर्वताश्रयिणश्च ये
निराहाराः सर्वगाश्च कुपथ्यास्त्रिगर्णारवसाः॥ कुप्यप्रावरणाश्चैव ऊर्णाः दर्वाः समुद्गकाः॥ त्रिगर्ता मंडलाश्चैव
किरातश्चामरैः सह॥ चत्वारि भारते वर्षे युगानि भारते ब्रवन्॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं॥ तेषां निस
र्गविस्तारमित्रु परिष्टात्प्रवक्ष्यामि संशयः॥ सूत उ॥ एतच्छ्रुत्वा तु ऋषय उत्तरे पुनरेव ते॥ शुश्रूषवस्त्वपृच्छन्त प्रकामास्ते महर्षयः
ऋषय ऊचुः॥ जंबूद्वीपस्य विस्तारं तथान्येषां द्विजोत्तमः॥ द्वीपानां वासिनां तेषां वृक्षाणां प्रब्रूहि नः॥ सूत उ०
शुश्रूषवो ऋषयो विप्रा तच्छ्रुणुध्वं मतं द्विजाः॥ जंबूखंडे किंपुरुषे सुमहानंदनोपमः॥ दशवर्षसहस्राणि स्थितिः किंपु
रुषेसृताः॥ जायंते मानवास्तत्र सुतप्तकनकप्रभाः॥ वर्षे किंपुरुषे पुण्ये प्लक्षो मधुवहः स्मृतः॥ तस्य किंपुरुषा ॥मत्स्य०॥
सर्वे पिबंते रसमुत्तमं॥ अनामयाह्यशोकाश्च नित्यं मुदितमानसाः॥ सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः॥ ॥१२६॥
ततः परं किंपुरुषात् हरिवर्षं प्रचक्षते॥ महारजतसंकाशा जायंते तत्र मानवाः॥ देवलोकच्युताः सर्वे महारजतमा
वासकाः॥ त्रयोदशसहस्राणि वर्षाणां ते नरोत्तमाः॥ आयुः प्रमाणं जीवंति येनु वर्षे इलावृते॥ मनोस्तु दक्षिणे पार्श्वे

निषधश्चोत्तरेणतु॥ सुदर्शनो नाम महान् जंबूद्वीपसनातनः॥ नित्यं पुष्पफलोपेतः सिद्धचारणसेवितः॥ तस्य नाम्ना
समाख्यातो जंबूद्वीपो वनस्पति॥ योजनानां सहस्रं च शतं न यातु महान्पुनः॥ उत्सेधो वृक्षराजस्य दिवमावृत्य ति
ष्ठति॥ तस्य जंबूफलरसो नदी भूत्वा प्रसर्पति॥ मेरुं प्रदक्षिणं कृत्वा जंबूमूले मे मगतः पुनः॥ तं पिबंति सदा हृष्टा
जंबूरसमिलाहृते॥ जंबूरसफलं पित्वा न जरा बाधते पि तान्॥ न क्षुधा न क्लमो वापि न दुःखं च तथाविधं॥ तत्र जं
बूनदंनाम कनकं देवभूषितं॥ तेषामुत्रपुरीषे वाष्टिस्या प्राप्तु च सर्वदा॥ इन्द्रगोपकप्रकाशं भूमिमिप तोयं समं तेनु तान् र
क्षःपिशाच यक्षाश्च सर्वे हेमवतास्तु ते॥ हेमकूटे तु गंधर्वा विज्ञेयाः साप्सरोगणाः॥ सर्वे नागानिषधे तेशेषवासुकित
क्षकाः॥ महामेरोस्त्रयस्त्रिंशत् क्रीडंते यज्ञियाः सुराः॥ नीलवैडूर्ययुक्तेस्मिन् सिद्धा ब्रह्मर्षयो वसन्॥ दैत्यानां दानवानां
च श्वेतः पर्वतउच्यते॥ शृंगवान्पर्वतः श्रेष्ठः पितृणां प्रतिसंचरः॥ इत्येतानि मयोक्तानि नव वर्षाणि भारते॥ भूतैर
पिनिविष्टानि गतिमंति ध्रुवाणि च॥ तेषां वृद्धिर्बहुविधा दृश्यते देवमानुषा॥ अशक्या परिसंख्येयं श्रद्धेयं तु बुभूषता॥ इति॥
श्रीमत्स्य०पु भुवनकोशो॥ ११३॥ मनुरुवाच॥ हरिते बुधपुत्रस्य जनार्दन मयाश्रुतं॥ कस्माज्जितं प्रदानं च वृषोत्सर्गं
स्वयंवरं॥ उत्पाद्य रूपं नरेंद्रस्य बुधपुत्रस्य केशव॥ कौतुहलेस मुत्पन्ने तन्ममाचक्ष्व पृच्छतः॥ केन धर्मविधानेन।
सतु राजा पुरूरवाः॥ अवाप नाहशो धर्मं सोभाग्यमपि चोत्तमं॥ देवा खिलु वनश्रेष्ठा गंधर्वाश्च मनोरमाम्॥ उर्वशीमं
गनाश्रेष्ठा सर्वथा येनतेनृपं॥ मत्स्य उवाच॥ शृणु पापविनाशकेन येन राजा पुरूरवाः॥ अवाप नाहशो रूपं सोभाग्यमपि

239
1998

पिबोन्नमं ॥ अतीते जन्मनि पुरा योऽयं राजा पुरूरवाः पुरूरवा इति ख्यातो मद्रदेशाधिपोऽभवत्तद्धि सः ॥ वास्तुपस्थानयेराजा
वास्तुपस्थानरे मनोः सर्वकल्पगुणैर्युक्तः केवलं रूपवर्जितः ॥ पुरूरवा मद्रपतिः कर्मणा केन पार्थिव ॥ बभूव क-
र्मणा केन रूपवांश्च बभूव तत् ॥ सूत उवाच ॥ द्विजग्रामे द्विजश्रेष्ठ नाम्ना त्वासीत्पुरूरवाः ॥ नद्याः कूले महाराज हर्षमा
जन्म पार्थिव ॥ स तु मद्रपती राजा यस्तु नाम्ना पुरूरवाः ॥ तस्मिन् जन्मन्यसौ विप्रो द्वादश्यां च सशासनः ॥ उपोष्य पूज-
या मास राज्यकामो जनार्दनं ॥ चकार सोपवासं च स्नानमभ्यंगपूर्वकं ॥ उपवासफलात्प्राप्तं राज्यं मद्रेष्वकंटकं
तु पोष्य न स्त्रयाभ्यांङ्गपहानो नजानत ॥ उषितेन नरेन्द्र स्नानाज्ञानमभ्यंगपूर्वकं ॥ वर्त्तनी संप्रयच्छेन रूपघ्नं तस्य रं
न्नपः ॥ राजेन्द्रः कथितं सर्वं यत्कृतं पूर्वजन्मनि ॥ मद्रेश्वरानुचरितेऽप्युत्तमस्य महीपतेः ॥ तस्य राजगुणाः सर्वे समुपे
तस्य भूपते ॥ जनानुरागोनेवासीद्रूपहीनस्य तस्य वै ॥ रूपकामः स मद्रेशः स पस्तेपे सुदारुणं ॥ राजा मंत्रिगते कृत्वा
जगाम हिमपर्वतं ॥ स वमायद्धि नीयस्तु पञ्चामेव महायशाः ॥ इह सुमनीर्थ महत्तं विषये चकेन दी ॥ ऐरावती निवि
ख्यातां ददर्शाति मनोरमां ॥ तुहिन गिरिभवां महौघवेगां तुहिनगभस्तिममानञ्जीलतोयां ॥ तुहिनसहशावगाहिमपुंर ॥ मत्स्य०
जां तु हिन यन्नाः स्मरितं ददर्श राजा ॥ इति श्री म० तपोवन गमनं नाम ॥ सूत उ ॥ स ददर्श नदीं पुण्यां दिव्यां हेमवतीं शु ॥ १२१
भां ॥ गंधर्वैश्च समाकीर्णां नित्यं शक्रेण सेवितां ॥ सुरेभमदसंसिक्तां समन्तात्तु विराजितां ॥ मध्येनजाकंदापांतस्मिन्
हंसिसर्वदा ॥ तपस्विशरणोपेतां महाब्राह्मणसेवितां ॥ ददर्श तपनीयाभां महाराजे पुरूरवाः ॥ सितहंसावलीछत्रां का-

शावामरराजितां ॥ मानिनी कामिवसनापरपन् प्रीतिपरां पयौ ॥ पुण्यां सत्रीनलाद्रद्यां मनसः प्रीतिवर्द्धनां ॥ सयद्रि
द्धिनां रम्यां सोमसृत्तिमिवापरां ॥ सुशीतशीघ्रपानीयां द्विजसंघनिषेवितां ॥ सुतां हिमवतः श्रेष्ठां चंचद्वीचिविराजि-
तां ॥ अम्लत्वादुसलिलां तापसेरुपसेवितां ॥ स्वर्गारोहणनिःश्रेणीं सर्वकल्मषनाशनीं ॥ अग्र्यां समुद्रमहिषीं महर्षी-
गणसेवितां ॥ सर्वलोकस्य सौख्यकारिणीं सुमनोहरां ॥ गोकुलाकुलतीरां तां रम्यां सेवालवर्जितां ॥ हंसमार-
समंघुष्टां जलजैरुपशोभितां ॥ आवर्त्तनाभिगंभीरां द्वीपोरुघनस्थलीं ॥ नीलनीरजनेत्रां तां सुस्मृत्कमलाननां
हिमाभ फेनवसनां चक्रवाकपयोधरां ॥ बलाकापंक्तिदन्तां तां चलमत्स्यां वलीभुवं ॥ स्वजलोद्भूतमातंगरम्यकुंभ
पयोधरां ॥ हंसरूपसमद्युष्टं मृणालचलपावली ॥ तस्यां रूपमदोन्मत्ता गंधर्वानुगतास्तथा ॥ मध्याह्नसमये राज
न्क्रीडन्त्यप्सरसां गणाः ॥ नाभिसरोविनिर्मुक्तां वहन्तीं कुंकुमं शुभां ॥ स्वनीरवर्णशुक्लाक्षैर्लीनापपरिह्रस्वकदु-
